*Calcutta Sanskrit College Research Series, No. XII.*

श्रीहरिरामतर्कवागीशकृत-

# ध्वंसजन्यभावयोः कार्यकारणभावरहस्यम्

S
181.43
H 225 D; 1
181.43
H 225 D;1

# OPINIONS

"I have now completed the reading of the works published in the Calcutta Sanskrit College Series of Texts and Studies. All the works break new ground, are models of industry and research and are creditable performances."

*MM. P. V. Kane*, M.A., LL.M., D.Litt.

**Chandogya Brahmana**

"A brilliant success worthy of emulation."

*MM. Gopinath Kaviraj*, M.A., D.Litt.

"We had to wait for an epoch to get a critical edition of this treatise. The edition is correct and well presented."

*Louis Renou.*

**Studies in the Upapuranas**

"The work is a literature of painful research."

*Louis Renou.*

"It is a scholarly work. The author has carefully brought out the important date. His discussion of their chronology is masterly in character."

*Ramesh Chandra Mazumdar.*

**Jnana-laksana-vicara**

"It will be highly useful to all interested in Indian Theory of Knowledge."

*Dhirendra Mohan Datta.*

**Philosophy of Word and Meaning**

"It is a work of rare scholastic excellence."

*Prasanta Behari Mukherji.*

**Kavyaprakasa of Mammata**

"Congratulate Professor Bhattacharyya for his magnificent work."

*Louis Renou.*

**Studies in the Upanisads**

"The book is well-written and will be a useful publication."

*S. Radhakrishnan.*

**Studies in Nyaya-Vaisesika theism**

"It furnishes clear evidence of the writer's hard labour in the field—especially of his logical acumen and critical discernment......As a pioneer work in the field it deserves to be properly appreciated."

*MM Dr. Gopinath Kaviraj. M.A. D.Litt.*

"This scholarly book......is a welcome addition to the commendable series of Research Studies initiated by you."

*Dr. D. M. Datta. M.A. Ph. D.*

# DHVAṂSA-JANYABHĀVAYOḤ

# KĀRYA-KĀRAṆABHĀVARAHASYAM

*Calcutta Sanskrit College Research Series No. XII*

Published under the auspices of the
Government of West Bengal.

**Texts No. 9**

# ध्वंसजन्यभावयोः कार्यकारणभावरहस्यम्

( श्रीहरिरामतर्कवागीशविरचितम् )

SANSKRIT COLLEGE
CALCUTTA
1960

*Calcutta Sanskrit College Research Series*

BOARD OF EDITORS

DR RADHAGOVINDA BASAK, M.A., Ph.D., *Chairman*

DR SUNITIKUMAR CHATTERJI, M.A., D.Litt. (Lond.)

PROFESSOR DURGAMOHAN BHATTACHARYYA, M.A., Kāvya-Sāṅkhya-Purāṇatīrtha

PROFESSOR ANANTAKUMAR BHATTACHARYYA, Nyāya-Tarkatīrtha

DR GAURINATH SASTRI, M.A., D.Litt., *Secretary* and *General Editor*

*Calcutta Sanskrit College Research Series No. XII*

# DHVAṀSA-JANYABHĀVAYOḤ KĀRYA-KĀRAṆABHĀVARAHASYAM

OF

ŚRĪ HARIRĀMA TARKAVĀGĪŚA

WITH THE COMMENTARY SUBODHINĪ

*By*

JAMINIKANTA TARKATĪRTHA
Senior Research Fellow, Sanskrit Seminar,
Government Sanskrit College, Calcutta

*Edited By*

NANIGOPAL SIDDHĀNTAVĀGĪŚA
Kāvya-Vyākaraṇa-Tarkatīrtha
Assistant Editor, Publication Branch, Department of
Post Graduate Training and Research, Sanskrit College, Calcutta

SANSKRIT COLLEGE
CALCUTTA
1960

Published by:
The Principal, Sanskrit College
1, Bankim Chatterjee Street, Calcutta-12

**Price : Rs. 5·00 only**

S
181.43
H225D;1

Printed by:
Sree Jogesh Chandra Sarkhel
Calcutta Oriental Press (Private) Ltd.
9, Panchanan Ghose Lane, Calcutta-9

कलिकातासंस्कृतमहाविद्यालयगवेषणाग्रन्थमाला-ग्रन्थाङ्कः १२

# ध्वंसजन्यभावयोः कार्यकारणभावरहस्यम्

( श्रीहरिरामतर्कवागीशविरचितम् )

कलिकातासंस्कृतमहाविद्यालयस्थ-
संस्कृतविद्यागोष्ठीप्रवीणसदस्येन
**श्रीमता यामिनीकान्ततर्कतीर्थेन**
विरचितया '**सुबोधिनी**' ति व्याख्यया समलङ्कृतम्

कलिकातासंस्कृतमहाविद्यालयस्थ-गवेषणाविभागान्तर्गत-
प्रकाशनविभागीय-सहकारिसम्पादकेन
काव्यव्याकरणतर्कतीर्थोपाधियुक्तेन
**श्रीननीगोपालसिद्धान्तवागीशेन**
यथापेक्षिततिप्पनीसंयोजनया
सम्पादितम्

१८८२ शकवत्सरे कलिकातानगर्यां प्रकाशितम्

81

INDIAN INSTITUTE OF ADVANCED STUDY
7654
16.11.65

Library IIAS, Shimla
S 181.43 H 225 D-H 225 D: 1
00007654

# FOREWORD

I feel very happy to see one more work of Harirāma Tarkavagīśa edited and published under the auspices of our Research Series. We have already published as many as three books of this astute Naiyāyika. This book, 'An enquiry into the causal relation between a positive effect and destruction' has also been edited with a running commentary in simple Sanskrit by Pandit Jamini Kanta Tarkatīrtha, the seniormost Naiyāyika of our age. The work will indeed be a source of great inspiration to our younger generation of scholars as the venerable Naiyāyika has shouldered the responsibility of this arduous task when he has reached the eightieth year of his life. I do not find any word which would adequately express my gratitude to this savant who has been taking an active interest in all the different present-day literary activities of this institution.

The editor of this book Pandit Nani Gopal Tarkatirtha is associated with our Publication Department and I am grateful to him for all that he has done in seeing the work through.

GAURINATH SASTRI

# TABLE OF CONTENTS


| Subject | | Page |
|---|---|---|
| 1. | Foreword ... ... ... | ix |
| 2. | Introduction ... ... ... | xiii—xvi |
| 3. | Manuscript material ... ... ... | xvii |
| 4. | Text of Dhvaṁsa-janyabhāvayoḥ Kārya-Kāraṇa-bhāva-rahasyam with 'Subodhinī' and critical notes | 1—53 |
| 5. | Errata ... ... ... ... | 55 |

# विज्ञापनम्

सुविदितमस्तु भवतां नव्यन्यायशास्त्रपारङ्गमानां विपश्चितां यन्मुष्टिमेया एव महामहोपाध्याय-गङ्गेशोपाध्यायप्रभृतयः केचन प्राचीनाः पण्डितप्रकाण्डा गदाधरभट्टाचार्य-प्रभृतयश्चार्वाग्भवा आचार्याः स्वया महत्तरया प्रतिभया शिष्यसम्पदा चानन्यसाधारणा मौलिकान् ग्रन्थनिचयान् निर्मायामरत्वमलभन्त ।

महामहोपध्याया नैयायिकप्रवरास्तत्रभवन्तः श्रीहरिरामतर्कालङ्कार-तर्कवागीशपादाः शिष्य-प्रशिष्यपरम्परया यशसा, निरङ्कुशेन पाण्डित्येन, लोकोत्तरप्रतिभया च सुरभारती-साम्राज्ये दिक्पाल इवासीत्। नैयायिकधुरन्धरस्तार्किकराजः श्रीगदाधरभट्टाचार्यो द्रव्यसारसंग्रहादिग्रन्थकर्ता रघुदेवश्च तस्यैव शिष्य आसीदित्यत्र नास्ति काचन विप्रतिपत्तिः। एतयोराविर्भावकालपर्यालोचनेन खृष्टीयसप्तदशशतकोत्तरार्धे तद्गुरोर्नैयायिकचूडामणेराविर्भावो बभूवेत्यवगम्यते ।

इदन्तु महदाश्चर्यजनकं यत् सुप्रसिद्धानां तत्रभवतां ग्रन्थकृतां कालिदासादीनां क्रान्त-दर्शिनां विदुषां जन्मस्थानादिषु यदि कस्यचिद् जिज्ञासा समुपजायते तत्र यथायथोत्तरं दुर्लभमिति मन्यामहे। तर्कालङ्कारपादस्य जन्मस्थानजिज्ञासायान्तु तद्वदेव, न किमपि सदुत्तरमुपलभ्यते । तस्य नवद्वीपवासित्वं केवलं प्रवादपरम्परयाऽस्माभिर्विज्ञायते। नोचेत् स्वल्पमपि प्रमाणमत्र विषये नास्ति यदस्मिन् ग्रामे भूखण्डे वा तत्रभवान् हरिरामः सशिष्योऽवसत्, अयमेव तस्यागारः, अत्रैवोपविश्यासावमरलेखन्या ग्रन्थराजिं व्यलिखत् ।

पण्डितप्रवरजगद्गुरुहरिरामो वङ्गीय आसीदित्यत्र न कस्यापि वैमत्यं विद्यत एव। तस्य ग्रन्थानां यास्तावत्प्रतिलिप्यः समासादिता स्ताः सर्वा एव वङ्गाक्षरेण लिपिबद्धाः। कलिकाता राष्ट्रियसंस्कृतमहाविद्यालयस्याध्यक्षपादाः सुगृहीतनामधेयाः श्रीगौरीनाथशास्त्रि-महोदया अशेषं श्रमं स्वीकृत्य प्रखरया च दृष्ट्या महाविद्यालयस्य गवेषणाप्रकाशनविभाग-तस्तएव ग्रन्था येन सत्वरं मुद्रिता भवेयुस्तत्र महान्तं प्रयासं कुर्वन्ति। तस्यैव प्रयत्नस्य फलस्वरूपोऽयं सुबोधिनीटीकोपेतं "ध्वंसजन्यभावयोः कार्यकारणभावरहस्य"मिति नामा ग्रन्थो मुद्राप्यते। अस्य ग्रन्थस्य विचार्यविषयस्तु पत्रान्तरे 'ग्रन्थप्रतिपाद्यविषयसंक्षेप' इति प्रबन्धे मया सविस्तरं प्रदर्शितः ।

कलिकाता संस्कृतमहाविद्यालयस्य विशाले ग्रन्थागारे न्यूनाधिक्येन विंशतिः स्वरचिताः प्राचीनहस्तलिखितास्तत्रभवतो हरिरामस्य मौलिकन्यायग्रन्था विद्यन्ते। महाविद्यालय-गवेषणाप्रकाशनविभागत इतः प्राङ् मुद्रितेषु ग्रन्थेषु ग्रन्थकृतोऽस्यैवेमे ग्रन्था मुद्रिताः।

(१) विमर्शिनीटीकोपेतं 'ज्ञानलक्षणाविचाररहस्यम्'।

(२) मुक्तिलक्ष्मीटीकोपेतो 'मुक्तिवादविचारः'।

(३) सरला टीकोपेतम् 'अनुमितेर्मानसत्वविचाररहस्यम्'।

आशंसे चानतिकालमेवावशिष्टा मुद्रणोपयोगिनो ग्रन्था मुद्रिता सन्तः पण्डित-मण्डलीनामशेषतो नव्यन्यायपिपठिषूणां धीमतां सन्तोषं जनयिष्यन्तीति शम्।

**श्रीननीगोपालतर्कतीर्थस्य**

# ग्रन्थप्रतिपाद्यविषयसंक्षेपः

महामहोपाध्यायेन श्रीमता हरिरामतर्कवागीशेन ध्वंसस्य ध्वंसापादिकां 'ध्वंसो विनाशी जन्यत्वा'दित्युनुमितिमुपन्यस्य तदीयहेतौ भावत्वरूपमुपाधिमुद्भाव्य तत्र चोपाधौ साध्य-व्यापकत्वग्राहकः प्रतियोगित्वसम्बन्धेन ध्वंसं प्रति तादात्म्येन जन्यभावत्वेन कारणत्वमिति कार्यकारणभावात्मकोऽनुकूलतर्कः प्रादर्शि । ततश्चैतद्घटनाशकालीनघटसमवेतनाशं प्रति स्वप्रतियोगिसमवेतत्वसम्बन्धेनैतद्घटनाशस्य कल्पितकारणताया घटत्वेऽपि वर्तमानत्वाद् घटत्वनाशापत्तिवारणाय विनाशित्वावच्छिन्नं प्रति जन्यभावत्वेन कारणत्वकल्पनस्यावश्यकत्व-मुपपादितम् । इत आरभ्य ग्रन्थशेषं यावद्द्विविधकार्यकारणकल्पनाभिर्नवीभूता विचारशैली प्रदर्शिता तर्कवागीशपादेन । तत्रादौ घटत्वनाशेऽपेक्षणीयस्य घटत्वाश्रयीभूतस्य यावद्घट-स्यैकाधिकरणयासम्भवाद् घटत्वनाशासम्भवं प्रदर्शयता महाप्रलयाव्यवहितपूर्वक्षणे कालिकेन यावद्घटसमावेशादसम्भवं निराकुर्वता च स्वरूपसम्बन्धेन घटनाशस्य कारणत्व-कल्पनेन घटत्वनाशापत्तिवारणेऽपि चैत्रत्वजातेर्नाशापत्तिः, इयञ्च चैत्रत्वजातेः स्वात्म-वृत्तित्वमभिप्रेत्य । तद्वारणार्थं स्वप्रतियोगिजन्यत्वसम्बन्धेन घटनाशस्य कारणत्वकल्पने नियमघटितजन्यत्वनिवेशे महागौरवमाशङ्क्य लाघवतः स्वप्रतियोगिसमवेतत्वसम्बन्धेनैव घटनाशस्य कारणत्वम्, तथा चापाद्यमानस्य घटत्वादिनाशस्य वारणार्थं जन्यभावत्वेन कारणत्वमवश्यं प्रकल्प्यम् । ततश्च जन्यभावत्वेन कारणत्वमप्रकल्प्य स्वप्रतियोगिसमवेतत्व-कालिकोभयसम्बन्धेन नाशवान् यः प्रतियोगित्वसम्बन्धेन तन्नाशत्वावच्छिन्नं प्रति स्वप्रति-योगिजन्यत्वसम्बन्धेन नाशस्य कारणत्वकल्पनया घटत्वादिनाशवारणेऽपि तादृशजन्यत्वं द्रव्यत्वावच्छिन्नजनकतानिरूपितं तद्व्यक्तित्वावच्छिन्नजनकतानिरूपितं वेति वितर्क्य तदुभयमेव दूषितं मूलकृता । कालिकमात्रेण कारणताया दुर्निरूप्यत्वं प्रदर्श्य स्वप्रतियोगिसमवेतत्वकालिको-भयसम्बन्धेन नाशस्य कारणत्वकल्पनस्याप्यशक्यता दर्शिता ।

ततश्च नित्यस्थले रूपनाशं प्रति रूपत्वेन, रसनाशं प्रति च रसत्वेनेत्यादिविशेषसामग्र्य-भावाद् विशेषसामग्र्यन्तरस्य च कल्पनानावश्यकतया कथं घटत्वनाशापत्तिरित्याशङ्क्य समनियताभावानामैक्याद् विनिगमनाविरहेणानन्तकार्यकारणभावापत्त्या तन्निवेशस्याशक्यत्वं प्रदर्श्य रूपान्यप्रतियोगिकध्वंसं प्रति रूपभेदस्य रसान्यप्रतियोगिकध्वंसं प्रति रसभेदस्येत्यादि-रीत्या विशेषकार्यकारणभावस्य कल्पनाच्च घटत्वनाशापत्तिस्तद्वारणार्थं जन्यभावत्वेन कारणत्वं

कल्पनीयमिति समाहितम्। ततश्च स्वप्रतियोगिजन्यत्वसम्बन्धेन द्रव्यनाशविशिष्टो यो द्रव्यसमवेतस्तन्नाशं प्रति स्वप्रतियोगिजन्यत्वसम्बन्धेन द्रव्यनाशस्य कारणत्वं कल्पयता जन्यभावत्वेन कारणत्वकल्पनस्यानर्थक्यमाशङ्कयानुगताभ्यां स्वत्वजन्यत्वाभ्यां घटितत्वेन कार्यकारणत्वकल्पनस्याशक्यत्वप्रदर्शनेन सा आशङ्का निराकृता।

तदनन्तरं विशेषसामग्रग्कल्पनात् ध्वंसस्य ध्वंसापत्तिवारणेन निरुक्तकार्यकारणभावे भावत्वनिवेशस्यानर्थक्यमाशङ्कय विशेषसामग्रीं विनापि क्षणिकान्त्यशब्दविनाशात् सर्वत्र-विशेषसामग्रीकल्पनाया अनावश्यकत्वं वितर्क्य क्षणिकान्त्यशब्दनाशेऽपि विशेषसामग्री-सम्वलनप्रकारः प्रदर्शितः, शब्दस्य क्षणिकत्वमनङ्गीकृतञ्च। तथापि महाप्रलये परमाणुक्रिया-तज्जन्यसंयोगयोर्नाशजनकीभूतनिमित्तकारणादृष्टनाशस्य कालिकेनैतददृष्टविशिष्टो यस्तन्नाशं प्रति एतददृष्टनाशस्य कारणत्वकल्पनेन ध्वंसस्यापि नाशापत्तिः। नाशवत्सत्प्रतियोगिक-त्वस्य कार्यतावच्छेदकत्वे च गौरवाधिक्यप्रसक्तया भावत्वनिवेशस्य लाघवं प्रदर्शितम्। ततश्च जन्यत्वनिवेशस्यानर्थक्यं नित्यानां नाशापत्तिभिया दूरीकृतम्। पुनश्च कालिकेन सत्तावत्त्वरूपानुगतजन्यत्वमात्रस्य नाशकारणतावच्छेदकत्वमाशङ्कय जन्यत्वेन कारणत्वं भावत्वेन वेति पक्षयोरन्यतरस्मिन् विनिगमकजिज्ञासायां भावत्वेन कारणतायामनन्ता-प्रामाणिकध्वंसस्य कारणताया अकल्पनरूपलाघवमेव विनिगमकम्, जन्यत्वेन कारणतायान्तु ध्वंसस्य ध्वंसस्तस्यापि ध्वंस इति क्रमेण तादृशध्वंसधाराकल्पनमेव पुनर्गौरवमाह मूलकारस्तर्क-वागीशपादः। जन्यत्वेन कारणत्वपक्षे घटोन्मज्जनापत्तिर्विनिगमिकेति यदन्यः प्राह तदानीं घटो ध्वस्त इति प्रतीतेः, तदपि दूषितम्। भावत्वेन कारणतायां प्रागभावमन्तर्भाव्य व्यभिचारश्च सांसर्गिकप्रतियोगितायां भावत्ववैशिष्ट्यं निवेश्य निवारितः। अन्यच्च भूरिविचारचातुर्यं प्रदर्शयता परिशेषे प्रतियोगित्वसम्बन्धेन ध्वंसं प्रति तादात्म्येन जन्यभावस्य कारणत्वमुपपादितं मूलकृता। तत्रभवता सुबोधिनीटीकाकृता मदध्यापक-पादेन व्याख्यानेन मूलं चतुरस्रं कृतमिति शम्।

श्रीननीगोपालतर्कतीर्थस्य

# Manuscript Material

The present work embodies a critical edition of Harirāma Tarkalaṅkāra-Tarkavāgīśa's *Dhvaṁsa-janyābhāvayoḥ Kāryakāraṇabhāva-rahasyam* deposited in the Library of the Calcutta Sanskrit College. There is a list of manuscripts of Harirāma's works in the *Catalogus Catalogorum*, but the scholars are of opinion that the greater part of Harirāma's work are already forgotten.[1] Inspite of our best effort we could not trace a copy of the present work in any manuscript library in India and abroad. Mm. Dr. S. C. Vidyabhusan also does not mention this text in his *History of Indian Logic.* Thus the persent edition is based on only one manuscript written on country-made paper in Bengali script. The relevant details are noted below:—

| | | | |
|---|---|---|---|
| Nyāya No. | ... | ... | $\frac{17}{148}$ |
| Substance | ... | ... | Paper. |
| Size | ... | ... | $18'' \times 3''$ |
| Folios | ... | ... | 3 |
| Lines | ... | ... | Eight to a page |
| Script | ... | ... | Old Bengali |
| Date | ... | ... | Not mentioned |

The manuscript is well-written and complete. It is bound up with other manuscripts of Harirāma. The page number begins with 80 on the right margin. Some folios have श्रीरामाय नमः written on the right margin. Occasional corrections appear on the upper and the lower margins. Almost all the folios have जन्यभावस्य written on the right margin. The readings are fairly correct The writing though small is clear, neat and compact. In page 81b a portion of the text has been left unfinished and added later on in pages 82a and 82b after the whole work has been finished. The manuscript begins with अथ ध्वंसो विनाशी जन्यत्वादित्यादौ and ends as भेदादेः स्वरूपतो हेतुः कल्पनमिति दिक् ॥

N. Tarkatirtha

---

1 Saraswati Bhavan Studies. Vol. V, p. 147. cf. also, D. C. Bhattacharya, Vanger Navyanyāya-carcā, p. 182.

# ध्वंसजन्यभावयोः कार्यकारणभावरहस्यम्

**अथ ध्वंसो विनाशी जन्यत्वादित्यादौ जन्यत्वावच्छिन्नविनाशित्वव्यापकं भावत्वमुपाधिः ।**

---

## सुबोधिनी

गङ्गामुमाकान्तरतां सवित्रीं नमन्नुमाकान्तमपि स्वतातम् ।
गङ्गाधरं पर्वतराजपुत्रीं पतिं प्रपन्नां मनसा स्मरामि ॥
शिववच्छिवचन्द्रं तं गुरुं नौमि कृताञ्जलिः ।
यत् कृपालेशलाभेन टीकाकृतौ ममोद्यमः ॥
ध्वंसस्य जन्यभावस्य कार्यकारणतां गतम् ।
रहस्यं समुपाश्रित्य हरिरामकृतिः शुभा ॥
व्याख्यानवासना तस्याः साफल्यं यदि याति मे ।
महिमा गुरुपादस्य गदाधरगुरोरपि ॥
शिष्याणां सुखबोधाय यतमानस्य मे यतः ।
कृतिरेषा ततो नाम्ना प्रथिताऽस्तु सुबोधिनी ॥

समाप्तिकामो मङ्गलमाचरेदितिशिष्टाचारानुमितश्रुतिनिर्देशाद् ग्रन्थकारो ग्रन्थसमाप्ति-परिपन्थिविघ्नव्यूहविध्वंसपटीयो मङ्गलमाचरति "अथे"ति । 'अथ स्यान्मङ्गले प्रश्ने' इत्यादि-कोषावधारितमङ्गलवाचकत्वस्य सिद्धत्वाद् 'अथ' शब्दस्य । मङ्गलञ्च विघ्नध्वंसद्वारा समाप्तिं सम्पादयति । समाप्तिस्तु—अव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णविशिष्टचरमवर्णस्य ध्वंसः, स्वप्रतियोग्यनुकूलकृतिमत्त्वसम्बन्धेन समाप्तिं प्रति स्वजन्यविघ्नध्वंसवत्तासम्बन्धेन मङ्गलस्य कारणत्वमिति । विघ्नश्च दुरितम् । अपरे तु प्रतियोगित्वसम्बन्धेन समाप्तिं प्रति स्वजन्य विघ्नध्वंसवत्तासम्बन्धेन मङ्गलस्य कारणत्वं, विघ्नध्वंसवत्ता च स्वाश्रयो-चरितत्वसम्बन्धेनेति वदन्ति । अन्वयव्यभिचारस्य कारणत्वग्रहाप्रतिबन्धकत्वमतेनेदम् । केचित्तु विघ्नध्वंस एव मङ्गलस्य फलम्, समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापादिति मन्यन्ते । अथशब्द एव शङ्खादिवन्मङ्गलात्मक इति शाब्दिकाः । 'ओङ्कारश्चाथ-

शब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ' इति प्राचीनाभाणकात्। यत्तु 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथोऽथेत्यमरकोषा[1]दारम्भमङ्गलोभयार्थकत्वमप्यथशब्दस्येति। तन्नातिपेशलम्, सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति नियमात् सकृदुच्चरिताथशब्दस्य निरुक्तोभयार्थकत्वानौचित्यात्। न च चन्द्रसूर्योभयशक्तपुष्पवन्तपदवदथशब्दस्याप्युभयशक्तत्वमिति वाच्यम्, सकृदर्थमित्यनेनैकशक्ति[2]प्रयोज्यार्थस्यैव[3] सिद्धान्तितत्वात्। वस्तुतस्तु[4] वर्णाभिव्यञ्जकप्राथमिकाक्षरपातादेवारम्भप्रतीतेरथशब्दस्यात्रारम्भकार्थकत्वानावश्यकत्वम्। विस्तरश्चास्यान्यत्र द्रष्टव्यः। ध्वंसस्य ध्वंसमापादयितुमनुमितिमुपन्यस्यति "**ध्वंसो विनाशी जन्यत्वादि**"ति। अत्र विनाशित्वं विनाशप्रतियोगित्वं विनाशो वा। 'यद्धर्मविशिष्टवाचकाद् भावविहितप्रत्ययस्तेन तद्धर्म अवगम्यते' इति नियमात्। आद्ये स्वरूपसम्बन्धेन, द्वितीये च प्रतियोगित्वसम्बन्धेन साध्यत्वम्।

निरुक्तानुमापकहेतौ व्यभिचारग्राहकमुपाधिमाह—"**जन्यत्वावच्छिन्नविनाशित्वव्यापकभावत्वमुपाधि**"रिति। भावत्वस्य प्रागभावान्तर्भावे विनाशित्वाव्यापकत्वादाह "जन्यतावच्छिन्ने"ति। जन्यत्वावच्छिन्नं जन्यत्वविशिष्टम्, वैशिष्ट्यञ्च सामानाधिकरण्यसम्बन्धेन। तथा च सामानाधिकरण्यसम्बन्धेन जन्यत्ववैशिष्ट्यस्य भाव एव वर्तमानत्वान्न भावत्वस्य व्यापकत्वहानिः।

न च विशिष्टस्य शुद्धानतिरिक्ततया तदव्यापकत्वं तदवस्थमितिवाच्यम्, विशिष्टस्य केवलानतिरिक्तत्वेऽपि विशिष्टाधिकरणताया विलक्षणत्वेन यदधिकरणान्तर्भावेन सामानाधिकरण्यं तदन्तर्भावेन विशिष्टाधिकरणतायाः स्वीकाराच्च व्यापकत्वाक्षतेः। अतएव गुणकर्मान्यत्वविशिष्टसत्ताधिकरणत्वं द्रव्ये नतु गुणे—इति नैयायिकानां सिद्धान्तः।

न च साध्यव्यापकसाधनाव्यापकस्योपाधित्वाद् विनाशित्वमात्रस्यैवात्र साध्यतया तदव्यापकत्वाद् भावत्वस्य कथमुपाधित्वमिति वाच्यम्, सर्वत्र साध्यव्यापकसाधनाव्यापकस्योपाधित्वाभावात्। तथात्वे स श्यामो मित्रातनयत्वादित्यादौ चिन्तामणिकारादिभिः

---

1 'अथ स्यान्मङ्गलप्रश्नकार्योरम्भेष्वनन्तरे' इति शाब्दिकस्मरणाच्च।

2 अत्र एकत्वं स्वजातीयद्वितीयरहितत्वं नत्वेकत्वसंख्याऽव्यावर्तकत्वापत्तेः।

3 पुष्पवन्तपदस्यैकशक्त्यैव चन्द्रसूर्योभयबोधकत्वम्।

4 तात्पर्यसत्त्वे हर्यादिपदवद् विभिन्नशक्त्या विभिन्नार्थबोधकतायाः प्रत्यक्षचिन्तामणावुपाध्यायपादैरुक्तत्वादाह वस्तुतस्त्विति।

**तत्रानुकूलतर्को व्यापकताग्राहकः, स च कार्यकारणभावः। यथा विनाशित्वावच्छिन्नं प्रति जन्यभावः कारणम्।**

---

प्रदर्शितस्य शाकपाकजन्यत्वस्योपाधित्वं व्याहन्येत, परन्तु पर्यवसितसाध्यव्यापकसाधनाव्यापक एवोपाधिः। यदाह चिन्तामणिकारः "तल्लक्षणन्तु पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापकत्वं, पर्यवसितसाध्यञ्च यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तद्धर्मावच्छिन्नं साध्यं, स च धर्मः क्वचित् साधनमेवेत्यादि"। यद्धर्मावच्छेदेन साध्यं प्रसिद्धम्, यद्धर्मवति साध्यं वर्तमानं तदवच्छिन्नम्, सामानाधिकरण्यसम्बन्धेन तादृशयत्किञ्चिद्धर्मविशिष्टमित्यर्थः। अत्र च यत्किञ्चिद्धर्मो हेतुभूतजन्यत्वमेव। तथा चात्र सामानाधिकरण्यसम्बन्धेन जन्यत्वरूपयत्किञ्चिद्धर्मविशिष्टविनाशित्वस्यैव पर्यवसितसाध्यतया तद्व्यापकत्वं भावत्वेऽक्षतमेव, साध्यव्यापकत्वञ्चात्र साध्यतावच्छेदकावच्छिन्नव्यापकत्वम्, तच्च साध्यतावच्छेदकांशे न्यूनेतरवारकपर्याप्तिघटितम्। अन्यथा गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ सत्ताऽ[1]व्यापकत्वाद् द्रव्यत्वस्योपाधित्वक्षतिः।

नन्वेवमपि पक्षेतरत्वरूपोपाध्याहितव्यभिचारग्रहेण प्रतिबन्धाद् व्याप्तिग्रहानुदयेन सर्वत्रैवानुमितिरुच्छिद्येतेति चेन्न पक्षेतरत्वस्य केवलान्वयितया पक्षेतराप्रसिद्धेः। न च तथापि पर्वतपक्षकसद्धेतौ पर्वतेतरत्वमुपाधिः स्यात्, तथा च पर्वतेतरत्वरूपोपाध्युन्नीतसाध्यव्यभिचारग्रहेण व्याप्तिग्रहप्रतिबन्धात् परार्थानुमितिरनुपपन्नेति वाच्यम्, सर्वत्र सद्धेतावनुकूलतर्कोपादितव्यभिचाराभावानुमानेन प्रतिबन्धात् साध्यव्यभिचारग्रहानुदयात्। साध्यव्यापकस्योपाधेर्व्यभिचारित्वेन हेतुना प्रकृतहेतौ धर्मिणि साध्यव्यभिचारित्वानुमानमुपाधेः प्रयोजनम्। एवञ्चात्र भावत्वरूपोपाधिव्यभिचारित्वेन हेतुना जन्यत्वधर्मिणि विनाशित्वव्यभिचारानुमित्या प्रतिबन्धाज्जन्यत्वहेतौ धर्मिणि विनाशित्वव्याप्तिग्रहानुदयेन ध्वंसो विनाशीत्याकारा नानुमितिरितिभावः।

भावत्वरूपोपाधौ विनाशित्वव्यापकत्वं साधयितुमुपन्यस्यति "**तत्रे**"ति। तत्रोपाधौ, अत्र सप्तम्यर्थो घटकत्वम्, अन्वयश्चास्य व्यापकतायां तथाचोपाधिघटकीभुताया व्यापकताया ग्राहकोऽनुकूलतर्क इत्यर्थः। अनुकूलतर्कं दर्शयति "**सच कार्यकारणभाव**" इति। सोऽनुकूलतर्क इत्यर्थः। कार्यकारणभावमुपन्यस्यति "**यथा विनाशित्वावच्छिन्नं प्रती**"

---

1 द्रव्यत्वस्य सत्ताधिकरणगुणादिनिष्ठात्यन्ताभावप्रतियोगित्वात्।

**न च तादृशकार्यकारणभावे किं प्रमाणमिति वाच्यम्, एतद्घटनाशकालीनैतद्घटसमवेतनाशं प्रति एतद्घटनाशत्वेन कार्यकारणभावकल्पनाद् घटत्वादेर्नाशापत्तेस्तद्वारणाय तत्कल्पनस्यावश्यकत्वात्।**

---

त्यादि। प्रतियोगित्वसम्बन्धेनेत्यादिः। "**जन्यभावः कारण**"मिति। तादात्म्यसम्बन्धेनेतिशेषः। विनाशित्वावच्छिन्नकार्यतानिरूपितकारणत्वस्य विनाशित्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वघटिततया जन्यत्वविशिष्टव्यापकत्वस्यापि तत्त्वेन[1] तादृशकार्यकारणभावग्रहेण भावत्वेऽपि[2] जन्यत्वविशिष्टविनाशित्वव्यापकत्वग्रहः सुलभ इति भावः। प्रागभावमन्तर्भाव्यव्यापकताभङ्गशङ्का चात्र सामानाधिकरण्यसम्बन्धेन जन्यत्वविशिष्टविनाशित्वरूपपर्यवसितसाध्यव्यापकत्वनिवेशेनैव स्वहस्तितेति न कुत्राप्यनुपपत्तिरिति संक्षेपः। विस्तरस्तूपाधिवादे द्रष्टव्यः।

एवञ्चात्र ध्वंसकारणीभूतस्य जन्यभावस्य तादात्म्यसम्बन्धेन ध्वंसेऽसत्वान्न ध्वंसस्य ध्वंसापत्तिः।

निरुक्तकार्यकारणभावे प्रमाणमाशङ्कते '**न चे**'त्यादिना। युक्तिमाह—"**एतद्घटनाशकालीनैतद्घटसमवेतनाशं प्रती**"त्यादि। एतद्घटनाशकालीनैतद्घटसमवेतरूपरसादिनाशमन्तर्भाव्य कार्यकारणभावोऽवश्यं निर्वाच्यः, तत्र च तादृशघटसमवेतरूपरसादीनां प्रत्येकं नाशमन्तर्भाव्य कार्यकारणभावकल्पने कार्यतावच्छेदकरूपत्वादिभेदभिन्नकार्यतानिरूपककारणताया अपि भिन्नत्वेन महागौरवं शङ्कमानेन मूलकृता लाघवत स्तादृशघटसमवेतत्वावच्छिन्ननाशत्वेनैतद्घटनाशत्वेन[3] च कार्यकारणभावः कल्पितः। एतद्घटनाशाव्यवहितोत्तरकालोत्पन्नैतद्घटसमवेतप्रतियोगिकनाशं प्रतीत्यर्थः। "**तद्वारणाये**"त्यादि। एतद्घटसमवेतघटत्वनाशापत्तिवारणाय। "**तत्कल्पनस्ये**"त्यादि। प्रतियोगित्वसम्बन्धेन विनाशित्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन जन्यभावत्वावच्छिन्नस्य कारणत्वकल्पनस्यावश्यकत्वादित्यर्थः। भावतादात्म्यवति आकाशादिनित्यपदार्थे प्रतियोगित्वसम्बन्धेन विनाशित्व-

---

1 जन्यत्वविशिष्टविनाशित्वरूपपर्यवसितसाध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वेनेत्यर्थः।

2 कारणताया व्यापकत्वे कारणतावच्छेदकस्यापि व्यापकत्वमर्थात् सिद्धमिति भावः।

3 स्वप्रतियोगिसमवेतत्वसम्बन्धेनेति शेषः।

**न च घटत्वस्य यावद्घटसमवेतत्वात्तत्स्थलीययावद्घटनाशकार्यतावच्छेदककोटिनिविष्टत्वेन यावद्घटनाशस्यैकत्वासम्भवान्नापत्तिरिति वाच्यम्, महाप्रलयपूर्वकाले यावद्घटनाशसत्त्वादेवापादनात्।**

---

रूपकार्यासत्त्वादन्वयव्यभिचारवारणाय "**जन्ये**"ति। अन्वयव्यभिचारस्याप्यन्यथासिद्धिमुद्रया कारणताविघटकत्वादिति मतेनेदम्। तादात्म्येन जन्यत्वमात्रावच्छिन्नस्य कारणत्वे ध्वंसस्य ध्वंसापादनमशक्यपरिहारं स्यादिति विशेष्यदलम्। न च तथापि प्रतियोगित्वसम्बन्धेन विनाशित्ववति प्रागभावे जन्यभावस्य तादात्म्यसम्बन्धेनासत्त्वाद् व्यतिरेकव्यभिचार इति वाच्यम्, सामानाधिकरण्यसम्बन्धेन भावत्वविशिष्टप्रतियोगिताया एव कार्यतावच्छेदकसंसर्गत्वात्। प्रागभावे सामानाधिकरण्यसम्बन्धेन भावत्वविशिष्टायाः प्रतियोगिताया अभावान्न व्यभिचाराशङ्कापीत्यग्रे स्फुटीभविष्यति।

अत्रेदमवधेयं—विनिगमनाविरहाज्जन्यत्वविशिष्टभावत्वेन भावत्वविशिष्टजन्यत्वेन च गुरुशरीरकारणताद्वयमपेक्ष्य जन्यत्वेन भावत्वेन च लघुशरीरं कारणताद्वयकल्पनमेव ज्यायः। न च जन्यत्वावच्छिन्नस्य ध्वंसस्य भावत्वावच्छिन्नस्य नित्यस्य च नाशापत्तिरितिवाच्यम्, कार्यतानिरूपितकारणतावच्छेदकानि यावन्ति तत् प्रत्येकावच्छिन्नानां यावतां सम्बलनादेव कार्योत्पादनियमेन तादात्म्येन भावत्वावच्छिन्नासमभिव्याहाराद् ध्वंसस्य, जन्यत्वावच्छिन्नस्यासम्बलनाच्च नित्यस्य ध्वंसापादनासम्भवात्।

पाकाधीनघटसमवेतरूपनाशस्थले व्यभिचारवारणायैतद्घटनाशकालीनत्वमेतद्घटसमवेतविशेषणम्। एतद्घटनाशकालीनैतद्घटसमवेतो यः प्रतियोगित्वसम्बन्धेन तन्नाशं प्रतीत्यर्थः। अत्र समवेतत्वमनिवेश्य घटवृत्तित्वनिवेशे शब्दादेरपि कालिकेन घटवृत्तित्वाद् व्यतिरेकव्यभिचारः। कारणतावच्छेदकसम्बन्धघटकतया स्वप्रतियोगिसमवेतत्वमनिवेश्य स्वप्रतियोगिवृत्तित्वनिवेशे कालिकसम्बन्धावच्छिन्नस्वप्रतियोगिवृत्तित्वसम्बन्धेन घटनाशस्य शब्दादेरपि सत्त्वादन्वयव्यभिचारः स्यात्। एतद्घटनाशकालीनैतद्घटसमवेतनाशं[1] प्रति एतद्घटनाशस्य स्वप्रतियोगिसमवेतत्वसम्बन्धेन कारणत्वे घटत्वस्यापि

---

1 एतत्कार्यकारणभावघटकतया तादृशघटसमवेतरूपादीनामेवैकैकशो निवेशोऽभिप्रेतः। न तु तादृशसमवेतत्वावच्छिन्नस्य, तथात्वे न च घटत्वस्य यावद्घटसमवेतत्वात्तत्स्थलीय यावद्घटनाशकार्यतावच्छेदककोटिनिविष्टत्वेनेत्याद्यग्रिमग्रन्थासङ्गतिः। घटसमवेतत्वावच्छिन्नस्य नाशापत्तिरित्युक्तेरेवोचितत्वात्।

**यदि च दैशिकविशेषणताविशेषेण नाशस्य कारणत्वं स्वीक्रियते तथा च तदानीं महाप्रलयाव्यवहितप्राक्काले स्वप्रतियोगिसमवायिदेशविरहाद् दैशिकविशेषणतासम्बन्धेन तदानीं तस्य तत्रावृत्तेरेव नापत्तिरित्युच्यते तदा कुलालजन्यतावच्छेदककोटौ घटनिष्ठवैजात्यचैत्रत्वादिजातीनां नाशापत्तेस्तदाश्रयासत्त्वेऽपि तत्समवायिदेशसत्त्वात् ।**

---

तादृशघटसमवेतत्वेन घटनाशाद् घटसमवेतघटत्वनाशापत्तिवारणाय प्रतियोगित्वसम्बन्धेन नाशत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन जन्यभावत्वेन कारणत्वकल्पनाया आवश्यकत्वमिति निर्गलितार्थः । एवञ्च सामान्यसामग्रीसमवहिताया एव विशेषसामग्र्याः कार्यजनकत्वनियमादेतद्घटनाशकालीनैतद्घटसमवेतनाशस्य विशेषकारणसत्त्वेऽपि विनाशित्वावच्छिन्नसामान्यकारणीभूतस्य जन्यभावस्य तादात्म्येन घटत्वेऽसत्त्वेन सामान्यसामग्र्यसम्वलनान्न घटत्वनाशापत्तिरिति भावः ।

तादृशतद्घटसमवेतनाशश्च समवेताश्रयीभूतानां यावतां नाशमपेक्षते । अत्र तु घटत्वरूपसमवेतस्याश्रयीभूतानां यावद्घटानां नाशसमूहस्य घटसमवेतघटत्वनाशवीजस्य कुत्राप्येकस्मिन्नधिकरणेऽसत्त्वाद् घटत्वनाशापत्तेरसम्भवेन विनाशित्वावच्छिन्नं प्रति जन्यभावस्य कारणत्वकल्पनं निष्प्रयोजनकमिति शङ्कते—"**न च घटत्वस्ये**"त्यादिना । घटनाशस्य कालिकेन कारणत्वमभिप्रेत्य समाधत्ते"**महाप्रलयपूर्वकाल**" इत्यादि ।

तथा च महाप्रलयाव्यवहितपूर्वकाले घटत्वाश्रयभूतानां यावद्घटानां नाशसमूहस्य कालिकसम्बन्धेन सत्त्वात्तत्र घटत्वनाशापत्तिरिति भावः ।

दैशिकविशेषणताविशेषेण घटनाशस्य कारणत्वमङ्गीकृत्य घटत्वनाशापत्तिनिरासार्थमाह "**यदि चे**"त्यादि । अन्यत् सुगमम् । "**तस्य**" घटत्वनाशस्य । तथा च महाप्रलयपूर्वक्षणे स्वप्रतियोगिसमवायिनो घटादिदेशस्याभावेनापादकविरहात् कुत्र घटत्वनाशमापादयेदितिभावः । पुनः शङ्कते—"**तदा कुलालजन्यतावच्छेदककोटा**"विति । अत्र सप्तम्यर्थो घटकत्वम्, तस्य च वैजात्येऽन्वयः । तेजस्त्वादिना साङ्कर्याद् घटत्वं न तैजसादिसाधारणमेकम्, कुलालजन्यतावच्छेदकघटत्वन्तु ततो भिन्नमेवेति प्रतिपत्तिप्रयोजनकं कुलालजन्यतावच्छेदकेति विशेषणम् ।

"**तदाश्रयासत्त्वेऽपि तत्समवायिदेशसत्त्वादि**"ति । महाप्रलयपूर्वक्षणे घटत्वाश्रयस्य घटस्याऽसत्त्वेऽपि परम्परया घटत्वसमवायिदेशस्य पार्थिवपरमाणोस्तत्र सत्त्वमित्यभिमानेन "तत्समवायिदेशसत्त्वादि"त्युक्तम् । परम्परया समवायिदेशत्वास्वीकारेत्वाह—

**न चैतद्घटनाशस्य स्वप्रतियोगिजन्यत्वसम्बन्धेन हेतुत्वमिति वाच्यम्, अनन्तकारणतायां प्रत्यासत्तिघटकतया जन्यत्वनिवेशापेक्षया लाघवात् स्वप्रतियोगिसमवेतत्वसम्बन्धेन हेतुत्वस्वीकारात्। स्वप्रतियोगिसमवेतत्वस्यापि स्वत्वघटितत्वेनानन्तकार्यकारणभावकल्पनम्, गौरवञ्चापेक्ष्य लाघवतो जन्यभावत्वावच्छिन्नस्यैकस्य कारणत्वस्वीकारस्यैव सम्यक्त्वात्।**

---

"**चैत्रत्वादिजातीनामि**"ति। एतच्च तत्तच्छरीरावच्छिन्नतत्तदात्मगतवैजात्यमेव चैत्रत्वादिकमित्यभिप्रेत्याभिहितम्। तथा च ध्वंसस्य स्वप्रतियोगिसमवायिदेशकत्वनियमात्[1] आत्मन एव स्वप्रतियोगिन श्चैत्रत्वस्य समवायिदेशत्वात् चैत्रत्वजातेर्ध्वंसापत्तिरिति तेषामाशयः। चैत्रत्वादिजातेः शरीरगतत्वे तु नैतच्छक्यापादनं स्वप्रतियोगिसमवायिदेशस्य शरीरस्य महाप्रलयपूर्वक्षणेऽसत्त्वादिति भाव्यम्।

निरुक्तशङ्कां समाधत्ते "**न चैतद्घटनाशस्ये**"ति। प्रतियोगित्वसम्बन्धेन तादृशघटसमवेतनाशं प्रति स्वप्रतियोगिजन्यत्वसम्बन्धेन घटनाशस्य कारणतया घटत्वादीनां नित्यत्वेन तत्र स्वप्रतियोगिजन्यत्वसम्बन्धेन कारणीभूतस्य तादृशघटनाशस्यासत्त्वान्न घटत्वादिनाशापत्तिरितिभावः। दूषयितुमुपन्यस्यति "**अनन्तकारणताया**"मित्यादि। स्वप्रतियोगिजन्यत्वसम्बन्धस्य स्वत्वघटितत्वेन कारणतायाः प्रत्येकव्यक्तिविश्रान्तत्वेनाननुगतत्वमाह—"**अनन्तकारणताया**"मिति। तादृशसम्बन्धस्य नियमघटितजन्यतागर्भितत्वेन सम्बन्धशरीरगौरवाधिक्यञ्चात आह—"**लाघवादि**"ति। नियमघटितजन्यतासम्बन्धापेक्षयेत्यर्थः। नियमघटितजन्यतागर्भितसम्बन्धानिवेशेनेत्यादिः। स्वप्रतियोगिसमवेतत्वस्य जन्यताघटितसम्बन्धापेक्षया लघुत्वेऽपि सम्बन्धशरीरगौरवतादवस्थ्यमननुगतत्वदोषापरिहारश्च। अतो "**लाघवत**" इति। अननुगतस्वत्वघटितकार्यकारणभावाकल्पनात्, स्वप्रतियोगिसमवेतत्वरूपगुरुतरकारणतावच्छेदकसम्बन्धाकल्पनालाघवादित्यर्थः। "**जन्यभावत्वावच्छिन्नस्ये**"ति। नन्वत्रकल्पेऽपि तत्तदन्यथासिद्ध्यनिरूपकत्वे सति नियतपूर्ववर्तिताकत्वरूपजन्यत्वस्याननुगतनियतपूर्ववर्तित्वघटितत्वेनाननुगतत्वमिति चेन्न, द्रव्यादिषट्कान्यतमत्वरूपभावत्वस्यानुगततया तत्र तत्तज्जन्यत्वस्य सामानाधिकरण्यसम्बन्धेनैकत्र

---

1 भावप्रतियोगिकध्वंसप्रागभावयोः स्वप्रतियोगिसमवायिदेशत्वव्याप्यत्वादित्यर्थः। व्याप्तिश्चात्र व्यापकसामानाधिकरण्यरूपा। तथा च महाप्रलयपूर्वक्षणे भावप्रतियोगिकध्वंसप्रागभावव्यापकस्वप्रतियोगिसमवायिदेशत्वस्याक्षतत्वान्नानुपपत्तिरितिभावः।

**न च कुलालविशेषजन्यतावद्घटनाशस्थल एव स्वप्रतियोगिजन्यत्वसम्बन्धेनैतद्घटनाशविशिष्टैतद्घटसमवेतनाशं प्रति एतद्घटनाशस्य स्वप्रतियोगिजन्यत्वप्रत्यासत्त्या हेतुत्वस्वीकारादेव नापत्तिरिति वाच्यम्, स्वत्वस्यैक्याभावेन कुलालजन्यघटसमसंख्यककारणतावच्छेदककोटौ जन्यत्वप्रवेशप्रसङ्गात्। मन्मते स्वप्रतियोगिसमवेतत्वप्रत्यासत्त्या हेतुत्वेनैव तद्घटनाशस्य सत्त्वेनोपपादितस्य सम्यक्त्वात्।**

---

द्वयमितिरीत्या विशेषणत्वान्नानुपपत्तिरिति ध्येयम्। वस्तुतस्तु कालिकसम्बन्धेन सत्तावत्त्वमेव जन्यत्वमत्रग्राह्यम्, द्रव्यादिषट्कान्यतमत्वरूपभावत्वस्याप्यनुगतत्वं कूटत्वस्यातिरिक्तत्वमतेऽनुगतत्वमभिप्रेत्य वोद्धव्यं कूटत्वस्यातिरिक्तत्वास्वीकारे भावत्वमप्यत्र समवायेन सत्तावत्त्वरूपं ग्राह्यं तेन नाननुगतत्वशङ्का[1]।

"तदपेक्षया लाघवात् स्वप्रतियोगिसमवेतत्वसम्बन्धेन हेतुत्वस्वीकारादनन्तकारणतायां प्रत्यासत्तिघटकतया जन्यत्वनिवेशापेक्षया" इत्यादर्शपुस्तकपाठोऽसंलग्नत्वापत्त्या भिन्नक्रमेण संयोज्य व्याख्यातः।

जन्यभावत्वेन कारणत्वमप्रकल्प्य प्रकारान्तरेण घटत्वनाशापत्तिवारणार्थं पुनः शङ्कते "**नच कुलालविशेषजन्यतावद्घटनाशस्थल**" इति। स्वप्रतियोगिजन्यत्वसम्बन्धेन घटनाशविशिष्टो यो घटसमवेतस्तन्नाशं प्रतीत्यर्थः। तथा चैतद्घटनाशस्य स्वप्रतियोगिजन्यत्वसम्बन्धेन घटत्वेऽसत्त्वान्न घटत्वनाशापत्तिरित्याशयः। दूषयति "**स्वत्वस्यैक्याभावेने**"ति। स्वप्रतियोगिजन्यत्वरूपसम्बन्धघटकस्वत्वस्य "ऐक्याभावेना"ननुगतत्वेनेत्यर्थः। जन्यत्वमप्यननुगतमेव, तथा च कारणतायाः प्रत्येकं जन्यताघटितसम्बन्धगर्भितत्वेन घटसमसंख्यककारणतापत्तिरितिभावः। तद्दूषयति "**मन्मते**" इति। मन्मते पूर्वपक्षिमते। पूर्वपक्षिणस्तु घटत्वनाशापादानकर्तारः। ते तु कार्यकारणतावच्छेदकत्वेन संसर्गविधया जन्यत्वाप्रवेशनिवन्धनं लाघवमनुरुन्धाना घटनाशविशिष्टस्यैतद्घटसमवेतस्य प्रतियोगित्वसम्बन्धेन नाशं प्रति स्वप्रतियोगिसमवेतत्वसम्बन्धेनैतद्घटनाशस्य कारणत्वं कल्पयन्ति। तन्मतेऽपि कार्यकारणभावस्य स्वत्वघटितत्वेनाननुगतत्वेऽपि गुरुशरीराननुगतजन्यत्वप्रवेशेन

---

1 भावत्वस्य द्रव्यादिषट्कान्यतमत्वरूपत्वे, अन्यतमत्वस्य भेदकूटावच्छिन्नप्रतियोगिकभेदवत्त्वेन कूटत्वस्य च धीविशेषविषयतारूपत्वाद् विषयभेदभिन्नविषयताघटितद्रव्यादिषट्कान्यतमत्वरूपभावत्वस्याप्यननुगतत्वमिति भावः।

**न च तथापि पाकाधीनघटसमवेतनाशे व्यभिचारवारणाय कार्यतावच्छेदककोटौ घटनाशस्य वैशिष्ट्यञ्च कालिकसम्बन्धेन वक्तव्यम्, तथा च घटत्वे कालिकसम्बन्धेन घटनाशस्यासत्त्वेन कार्यतावच्छेदकानाक्रान्तत्वादेव नापत्तिरिति वाच्यम्, यत्र तृतीयक्षणावस्थायिद्रव्यसमवेतत्वेन तत्समवेतनाश स्तत्र व्यभिचाराभावेन तद्वारणार्थं तादृशविशेषणानुपादानात्।**

---

कथञ्चिल्लाघवम्, एवञ्च स्वप्रतियोगिसमवेतत्वसम्बन्धेनैतद्घटनाशविशिष्टो य एतद्घटसमवेतः प्रतियोगित्वसम्बन्धेन तन्नाशं प्रति स्वप्रतियोगिसमवेतत्वसम्बन्धेन तद्घटनाशस्य कारणत्वमिति च कार्यकारणभावे स्थिते घटत्वनाशापत्तिः पुनस्तदवस्थेति पूर्वपक्षिणामाशयः।

भ्रान्तः पुनः कश्चित्तादृशकार्यकारणभावे व्यभिचारमाशङ्कते "**नच तथापि पाकाधीने**"-त्यादि। भ्रान्तिस्त्वनुपदं ग्रन्थकृदुक्त्यैव व्यक्तीभविष्यति। यत्र पाकाधीनो घटसमवेतरूपनाशो न तु घटनाशाधीनः, यथाकथञ्चित् सम्बन्धेन घटनाशविशिष्टे प्रतियोगित्वसम्बन्धेन नाशप्रतियोगिनि तादृशे घटसमवेतरूपे स्वप्रतियोगिसमवेतसम्बन्धेन यदा कदाचिद् भाविनो घटनाशस्यासत्त्वाद् व्यतिरेकव्यभिचारः। कार्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपव्यभिचारस्य कार्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वघटितकारणताग्रहस्य विघटकत्वेन निरुक्तकार्यकारणभावग्रहस्य दुर्घटत्वमितिभावः। यदा कदाचिद् भाविनो घटनाशस्य प्रतियोगित्वमिदानीन्तने घटे न वर्तत इति च भ्रान्तस्याभिमानः। घटसमवेतरूपे कालिकसम्बन्धेन घटनाशवैशिष्ट्यं निवेश्य व्यभिचाराप्रसक्तता दर्शिता मूलकारेण "**कार्यतावच्छेदकानाक्रान्तत्वादेव नापत्ति**"रित्यन्तग्रन्थेन। "नापत्ति"र्न निरुक्तव्यभिचारापत्तिः। सुदूरं भविष्यतो घटनाशस्यासमानकालीने रूपेऽवर्तमानत्वान्न कार्यतावच्छेदकाक्रान्तत्वमिति पूर्वपक्षिणामाशयः। भ्रान्तिमपनुद्य व्यभिचाराप्रसक्तिं प्रदर्शयन् कार्यकारणभावे कालिकेन वैशिष्ट्यनिवेशस्यानावश्यकत्वं स्थलान्तरे प्रयोजनसाधकत्वञ्च प्रदर्शयति "**यत्र तृतीयक्षणे**"-त्यादिना। 'यत्र' पाकस्थले। "तृतीयक्षणावस्थायी"त्यादि घटनाशं विनैव पाकाधीनघटसमवेतरूपनाश इत्यर्थः। '**तत्र**' पाकाधीनरूपनाशस्थले। '**व्यभिचाराभावेन तद्वारणार्थं**' व्यभिचारवारणार्थम्। "**तादृशविशेषणानुपादानात्**"—कालिकेन नाशरूपविशेषणस्य कार्यतावच्छेदककोटौ निवेशस्यानावश्यकत्वादित्यर्थः। अत्रेदं चिन्त्यते—नाशासमानकालीने नाशाव्यवहितवस्तुनि नाशप्रतियोगित्वस्यावश्यस्वीकार्यत्वाद् घटो नङ्क्ष्यतीति प्रयोगानुरोधाद् बहुकालव्यवधानोत्पन्ननाशप्रतियोगित्वस्यापीदानीन्तने वस्तुनि तत्सत्ताया अवर्जनीयत्वान्नाशप्रतियोगित्वस्य व्याप्यवृत्तित्वात्। अन्यथा घटाव्यवहितोत्तरकालीन-

**तद्वलादेवापादनसम्भवात्, तद्वारणाय तृतीयक्षणावस्थायिद्रव्यनाशस्थलीयकार्यतावच्छेदककोटौ तादृशविशेषणदानापेक्षया जन्यभावत्वेनैव हेतुत्वस्य सम्यक्त्वात्। तत्कार्यतावच्छेदककोटौ विशेषणस्य कालिकसम्बन्धेन वैशिष्ट्यं प्रक्षिप्यापत्तिवारणसम्भवाच्च।**

**न च स्वप्रतियोगिसमवेतत्व-कालिकोभयसम्बन्धेन नाशवन्नाशत्वावच्छिन्नं**

---

नाशप्रतियोगित्वस्यापि तत्पूर्वकालाधिष्ठिततद्घटेऽसत्त्वं प्रसज्येत। अतएव निरुक्तपाकाधीनरूपनाशस्थलेऽपि तादृशनाशस्य स्वप्रतियोगिसमवेतरूपप्रतियोगिकत्वात् कार्यतावच्छेदकाक्रान्तत्वं तादृशरूपस्य कारणतावच्छेदकाक्रान्तत्वञ्च, अतस्तत्र व्यभिचारशङ्का भ्रान्तिप्रणोदितेतिभाव इति ध्येयम्।

ननु मास्तां निरुक्तकार्यकारणव्यभिचारो घटत्वनाशापत्तिस्तु दुष्परिहार्येत्याह "**तद्बलादेवापादनसम्भवा**"दिति। "तद्बला"न्निरुक्तात् स्वप्रतियोगिसमवेतत्वसम्बन्धेनैतद्घटनाशविशिष्टघटसमवेतनाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमवेतत्वसम्बन्धेनैतद्घटनाशस्य कारणत्वमिति कार्यकारणभावादित्यर्थः। "आपादनसम्भवात्" घटत्वनाशस्यापत्तिहेतो र्वर्तमानत्वादितिभावः। "**तद्वारणाय**" घटत्वनाशापत्तिवारणायेत्यर्थः। वारणप्रकारमाह—"**तृतीयक्षणावस्थायिद्रव्यनाशस्थलीये**"त्यादि। अत्र तृतीयक्षणावस्थायित्वं द्रव्यविशेषणम्, एतेन पूर्वोक्तपाकाधीनद्रव्यनाश एवाभिप्रेतः। "**तादृश विशेषणदानापेक्षया**" कालिकेन नाशरूपविशेषणप्रक्षेपापेक्षया। "**जन्यभावत्वेन हेतुत्वस्यैवे**"ति। प्रतियोगित्वसम्बन्धेन नाशं प्रति तादात्म्येन जन्यभावत्वेन कारणत्वकल्पनस्येत्यर्थः।

नन्वेतादृशातिरिक्तकार्यकारणभावः कथं कल्प्यताम्, घटनाशापत्तिवारणाय कालिकेनैतद्घटनाशविशिष्टो यः स्वप्रतियोगिसमवेतत्वसम्बन्धेन तन्नाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमवेतत्वसम्बन्धेनैतद्घटनाशस्य कारणत्वकल्पनेनैव घटसमवेते घटत्वे कालिकसम्बन्धेनैतद्घटनाशवैशिष्ट्याभावेन कार्यतावच्छेदकानाक्रान्तत्वाद् घटत्वनाशापत्तिवारणं स्यादित्याह—"**तत् कार्यतावच्छेदककोटावित्या**"दि। "**विशेषणस्य**" नाशरूपस्येत्यर्थः। ननु निरुक्तकार्यकारणभावमहिम्ना घटत्वनाशापत्तिवारणेऽपि घटत्वे स्वप्रतियोगिसमवेतत्वसम्बन्धेन घटनाशस्य वर्तमानतया तत्र च कालिकसम्बन्धेन घटनाशविशिष्टो यः स्वप्रतियोगिसमवेतः प्रतियोगित्वसम्बन्धेन तन्नाशत्वावच्छिन्नस्यासत्त्वादन्वयव्यभिचारः, अन्वयव्यभिचारस्याप्यन्यथासिद्धिमुद्रया कारणताविघटकत्वात्। अतो व्यभिचारोद्धारमुखेन घटत्वनाशापत्तिवारणप्रयोजनकं प्रकारान्तरमुपन्यस्यति—"**न चेत्यादि पृथक् कारणत्वकल्पनये**"त्यन्तम्।

**प्रति स्वप्रतियोगिजन्यत्वसम्बन्धेन नाशत्वेन कारणता। कारणतावच्छेदककोटौ जन्यत्वप्रवेशेनैव नित्यनाशापत्तिवारणं सम्भवतीति किं जन्यभावत्वेन पृथक् कारणत्वकल्पनयेति वाच्यम्।**

---

पूर्वकल्पे स्वप्रतियोगिसमवेतस्य प्रकारविधया कार्यकारणभावग्रहे भाने प्रकारतावच्छेदकसम्बन्धस्याप्यपेक्षणीयत्वेन गौरवम्, अत्र कल्पे च अतएव विशिष्टबुद्धौ संसर्गस्य भानेऽपि किञ्चित् प्रकारकबुद्धावपेक्षणीयस्य किञ्चिज् ज्ञानस्य संसर्गभानार्थं पूर्वमपेक्षणीयताकृतगौरवशङ्काऽपि निरस्ता। सम्बन्धमुद्रया तन्निवेशे लाघवं संसर्गतायाः संसर्गानवच्छिन्नत्वादित्यपि द्रष्टव्यम्। "**स्वप्रतियोगिसमवेतत्व-कालिकोभयसम्बन्धेन नाशवन्नाशत्वावच्छिन्नं प्रती**"त्यादि। निरुक्तोभयसमम्बन्धेन नाशविशिष्टो यः प्रतियोगित्वसम्बन्धेन तन्नाशत्वावच्छिन्नं प्रतीत्यर्थः।

अत्र सम्बन्धघटकतया कालिकमात्रोक्तौ पाकाधीनघटरूपनाशस्थले कालिकसम्बन्धेन स्वसमानकालीनस्य यस्य कस्यचिन्नाशस्याधिकरणे घटरूपे स्वप्रतियोगिजन्यत्वसम्बन्धेन नाशस्यावर्तमानत्वात्। [1]अथवा पार्थिवपरमाणावपि पाकवादिनये कालिकेन यत्किञ्चिन्नाशवति पार्थिवपरमाणुरूपे स्वप्रतियोगिजन्यत्वसम्बन्धेन कस्यापि नाशस्यासत्त्वाद् व्यतिरेकव्यभिचारतादवस्थ्यवारणाय [2]सर्वत्र द्व्यणुके व्यभिचारवारणाय च स्वप्रतियोगिसमवेतत्वस्योभयसम्बन्धघटकतया निवेशः।

स्वप्रतियोगिसमवेतत्वसम्बन्धमात्रनिवेशे स्वप्रतियोगिसमवेतत्वसम्बन्धेन घटनाशवति घटत्वे स्वप्रतियोगिजन्यत्वसम्बन्धेन तन्नाशाभावाद् व्यभिचारतादवस्थ्यवारणाय कालिकेति।

---

1 पाकाधीनरूपनाशस्थलेऽपि रूपसमवायिनो घटस्य यदा कदाचिदुत्पन्ननाशप्रतियोगित्वात् स्वप्रतियोगिजन्यत्वसम्बन्धेन पाकाधीनरूपस्यापि तादृशनाशवत्त्वेन व्यभिचाराभावादाह—अथवेति।

2 न्यायमते परमाणौ पाकास्वीकारादाह सर्वत्रेत्यादि। तथा च कालिकसम्बन्धेन यस्य कस्यचिन्नाशविशिष्टं यद्द्व्यणुकं प्रतियोगित्वसम्बन्धेन नाशरूपकार्याधिकरणे तत्र स्वप्रतियोगिजन्यत्वसम्बन्धेन नाशरूपकारणस्यावर्तमानत्वाद् व्यभिचारसङ्गतिः।

**स्वप्रतियोगिजन्यत्वमित्यत्र जन्यत्वं द्रव्यत्वावच्छिन्नजनकतानिरूपित-जन्यत्वं निवेश्यते, तत्तद्व्यक्तित्वावच्छिन्नजनकताघटितं वा, आद्ये पट-समवेतरूपादेरपि द्रव्यत्वेन घटजन्यत्वाद् घटनाशात् पटरूपनाशापत्तेः। न द्वितीयः, समवायिनस्तत्तद्व्यक्तित्वेन हेतुत्वे मानाभावात्। व्यधि-करणगुणापत्तिवारणस्य क्लृप्तहेतुनैव सम्भवात्।**

---

व्यावृत्तिरियं [1]चिन्तनीया। एवञ्च घटत्वस्य कालिकघटितनिरुक्तोभयसम्बन्धेन नाशवत्त्वाभावान्न-कार्यतावच्छेदकाक्रान्तत्वं, स्वप्रतियोगिजन्यत्वसम्बन्धेन तन्नाशवत्त्वाभावाच्च न कारणतावच्छेद-काक्रान्तत्वमपि। अतो जन्यभावत्वेनातिरिक्तकारणत्वकल्पनं निष्प्रयोजनकमितिभावः।

उक्तकार्यकारणभावस्याशक्यकल्पनाकत्वं प्रदर्श्य जन्यभावत्वेन कारणत्वकल्पनाया आवश्यकत्वं द्रढयति "**स्वप्रतियोगिजन्यत्वमित्यत्रे**"त्यादिना। "अत्रे"ति सप्तम्यर्थो घटकत्वं तस्य च जन्यत्वेऽन्वयः। "**द्रव्यत्वावच्छिन्ने**"ति—स्वप्रतियोगिनिष्ठेत्यादिः पूरणीयः। स्वप्रतियोगिनिष्ठं यद्द्रव्यत्वं तदवच्छिन्नेत्यर्थः। "**तत्तद्व्यक्तित्वावच्छिन्न-जनकताघटितं वे**"ति—अत्रापि स्वप्रतियोगिनिष्ठेत्यादिः। तथा च स्वप्रतियोगिनिष्ठद्रव्य-त्वावच्छिन्नजनकतानिरूपितजन्यत्वं—स्वप्रतियोगिनिष्ठतत्तद्व्यक्तित्वावच्छिन्न जनकता निरूपित-जन्यत्वं वेत्युभयः पक्षः।

आद्ये दोषमाह—"**पटसमवेतरूपादेरपि द्रव्यत्वेन घटजन्यत्वाद् घटनाशात् पट-रूपनाशापत्ते**"रिति। अधिकरणभेदेऽप्येकधर्मावच्छिन्नाधिकरणताया इवैकधर्मावच्छिन्नजनक-ताया अप्यैक्येन घटपटयोर्जनकताया एकेन द्रव्यत्वेनावच्छिन्नत्वेनैक्याद् घटनाशात् पटरूप-नाशापत्तिरिति भावः। द्वितीयपक्षे दोषमाह—"**समवायिनस्तत्तद्व्यक्तित्वेन हेतुत्वे मानाभावादि**"ति। समवायिन इत्यत्र षष्ठ्यर्थो निष्ठत्वमन्वयश्चास्य हेतुत्व इत्यनेन। हेतुत्व इत्यत्र सप्तम्यर्थोऽनुयोगिकत्वम्। तत्तद्व्यक्तित्वेनेत्यत्र तृतीयार्थोऽवच्छिन्नत्वम्। माना-भावश्च प्रयोज्यत्वसम्बन्धावच्छिन्नमानप्रतियोगिताकः। मानं मितिकरणम्। मितिश्च सम्यक् परिच्छित्तिः। प्रकारताविशिष्टप्रकारताशालिज्ञानमिति यावत्। वैशिष्ट्यञ्च

---

1 चिन्ताबीजन्तु—घटत्वस्य स्वप्रतियोगिसमवेतत्वसम्बन्धेन घटनाशवत्त्वेऽपि प्रति-योगित्वसम्बन्धेन नाशरूपकार्याभावात् कार्याधिकरणे कारणासत्त्वनिबन्धनव्यभिचार-शङ्काऽपि नोदेति कथं तद्वारणार्थं कालिकसम्बन्धनिवेशव्यावृत्तिदानप्रयास इति। स्वप्रतियोगिजन्यत्वस्य कारणतावच्छेदकसंसर्गत्वे कार्यतावच्छेदकसंसर्गघटकतया स्वप्रतियोगि-समवेतत्वमात्रनिवेशेनैवोपपत्तिर्भवति नवेति सुधीभिश्चिन्तनीयम्।

स्वतादात्म्य-स्वविशिष्टाऽऽधेयतानिरूपिताधिकरणतावन्निष्ठविशेष्यतानिरूपितत्वोभयसम्बन्धेन[1]। आधेयतायां प्रकारतावैशिष्ट्यञ्च स्वावच्छेदकधर्मावच्छिन्नत्व—स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन। ज्ञानभेदे विषयिताभेदास्वीकर्तारः केचिन्नित्यज्ञानावृत्तिविषयिताशून्यज्ञानत्वं प्रमात्वमाचक्षते। ह्रदो जलवान् वह्निमांश्चेत्याद्यांशिकप्रमायां तेषामनुपपत्तिश्चिन्त्या। चिन्तावीजन्तु—ज्ञानभेदे विषयिताभेदस्वीकृतिमतेऽस्मदादिप्रमायामव्याप्त्यापत्तिस्तज्ज्ञानीयविषयिताया नित्यज्ञानावृत्तित्वादिति। एवञ्च समवायिनिष्ठतत्तद्व्यक्तित्वावच्छिन्नहेतुत्वानुयोगिकप्रयोज्यत्वसम्बन्धावच्छिन्नप्रतियोगिताकमानाभाव इति समुदितवाक्यार्थो लभ्यते।

नन्वेवं वाक्यार्थोऽयं सिद्ध्यसिद्धिभ्यां व्याहतः। तथा हि समवायिन इति पदसार्थक्यान्मूलग्रन्थसमन्वयाच्च समवायिहेतुत्वमेवात्रावश्यं ग्रहणीयम्, तत्तद्व्यक्तित्वावच्छिन्नसमवायिहेतुत्वस्य सिद्धत्वे तत्र प्रयोज्यत्वसम्बन्धेन मानवत्त्वमप्यवश्यमङ्गीकार्यं[2] न तु प्रयोज्यत्वसम्बन्धेन तदभावम्, असिद्धत्वे चालीकप्रतियोगिकाभाव इव अलीकानुयोगिकाभावोप्यसिद्ध इत्युभयतः पाशा रज्जुरिति चेन्नैवम्, अत्र मानपदस्य लक्षणया मानप्रयोज्यत्वपरतया समवायिनिष्ठहेतुत्वानुयोगिकतत्तद्व्यक्तित्वावच्छिन्नत्वविशिष्टमानप्रयोज्यत्वप्रतियोगिताकाभावस्यैवात्र वाक्यार्थत्वात्[3]।

समवायेन गुणत्वावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेनेत्येवं रीत्या सामान्यकार्यकारणभावस्य घटीयरूपं प्रति घटत्वेन, पटीयरूपं प्रति पटत्वेन तादात्म्येन कारणत्वमित्यादिरीत्या विशेषकार्यकारणभावस्य च कल्पनेनैवोपपत्तौ तद्घटीयतद्रूपव्यक्तित्वावच्छिन्नं प्रति तद्घटव्यक्तेः कारणत्वकल्पनस्यावश्यकत्वमिति भावः। ननु विशेषकार्यकारणभावास्वीकारे व्यधिकरणगुणापत्तिरित्याशङ्क्याह "**व्यधिकरणगुणापत्तिवारणस्य क्लृप्तहेतुनैव सम्भवादि**"ति।

---

1 स्वतादात्म्यानिवेशे ह्रदो वह्निमानितिज्ञानीयवह्नित्वावच्छिन्नसंयोगसम्बन्धावच्छिन्नप्रकारताया अपि ह्रदो जलवानितिज्ञानीयप्रकारताविशिष्टत्वाद् ह्रदो वह्निमानितिज्ञानस्य प्रमात्वापत्तिः। द्वितीयसम्बन्धानिवेशे भ्रममात्रेऽतिव्याप्तिस्तत्तज्ज्ञानीयप्रकारतायां तादात्म्येन स्वविशिष्टत्वात्।

2 सिद्धत्वस्य मानाप्रयोज्यत्वाभावादिति भावः।

3 रूपादिसमवायिघटादिनिष्ठायां प्रकारतायां प्रतियोगितायां वा प्रसिद्धस्य तद्व्यक्तित्वावच्छिन्नत्वविशिष्टमानप्रयोज्यत्वस्याभावः समवायनिष्ठहेतुत्वे सुलभः।

**( अपरञ्च ) एवञ्च स्वप्रतियोगिसमवेतत्वसम्बन्धेन नाशस्य हेतुत्वाद् घटत्वादेस्तत्र नाशापत्ति र्दुर्वारैवेति । न च तन्नाशस्य कालिकसम्बन्धेन हेतुता प्रतियोगितासम्बन्धेन कार्यं प्रति, घटत्वादौ तेन सम्बन्धेन कारणा-**

---

समवायेन पटरूपत्वावच्छिन्नं प्रति तादात्म्येन पटत्वेन, घटरूपत्वावच्छिन्नं प्रति तादात्म्येन घटत्वेनेत्यादिरीत्या क्लृप्तहेतुनैव व्यधिकरणरूपापत्तेर्वारणादितिभावः ।

ननु तद्व्यक्तित्वेन कार्यकारणभावास्वीकारे तद्घटव्यक्तिसमवेतरूपादेर्घटव्यक्त्यन्तरे उत्पादापत्तिस्तत्रापि घटत्वावच्छिन्नस्य तादात्म्येन सत्त्वादिति चेन्न, तद्व्यक्ति-समवेततद्रूपादिव्यक्तिं प्रति व्यक्त्यन्तरस्य तादात्म्येन, तद्व्यक्तिप्रतियोगिभेदस्य स्वरूपेण वा[1] प्रतिबन्धकत्वात् । तद्व्यक्तित्वञ्चात्र द्रव्यत्वसमानाधिकरणोभया-वृत्तिधर्मः, उभयावृत्तित्वञ्च, स्ववृत्तित्व—स्वान्यवृत्तित्वोभयसम्बन्धेन किञ्चिद्-विशिष्टान्यत्वम्, स्वप्रतियोगिवृत्तित्व-स्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यत्वं वा । यत्तु पक्षतायां जगदीशतर्कालङ्कारेण "तद्व्यक्तित्वञ्च तादात्म्येन सैव व्यक्तिरित्यदोष" इति सिद्धान्तितत्वात् तद्व्यक्तित्वस्य तद्व्यक्तिस्वरूपत्वे कारणवृत्तस्य कारणतावच्छेदकानति-प्रसक्तधर्मस्यैव कारणतावच्छेदकत्वात् तद्व्यक्तिस्वरूपकारणावृत्तितया तद्व्यक्तित्वस्य कारण-तावच्छेदकत्वमप्यसंभवि । एतेन तत्तद्व्यक्तित्वेन प्रतिबन्धकताबाहुल्यमपीति, तन्न मनोरमम्, जगदीशमताश्रयणेऽपि तद्व्यक्तित्वस्य तद्व्यक्तिनिष्ठत्वस्याप्यवश्यमङ्गीकार्य-त्वाद्, अन्यथा इदानीन्तनतत्परामर्शव्यक्तितो भाविन्या अनुमितेर्वारणाय तत्तदनु-मितिव्यक्तिं प्रति तत्तद्व्यक्तित्वेन तत्तत्परामर्शव्यक्तेः कारणताकल्पनस्यान्यत्र चानु-पपत्तेः । एवञ्च तद्व्यक्तित्वस्य तद्व्यक्तिवृत्तिताया आवश्यकत्वमिति । साम्प्रदायिकास्तु कारणतायाः किञ्चिद्धर्मावच्छिन्नत्वनियमेन जगदीशमतादरेऽपि तद्व्यक्तिनिष्ठकारणताया स्तद्व्यक्तित्वावच्छिन्नत्वे स्वनिष्ठकारणतायाः स्वावच्छिन्नत्वे आत्माश्रयोऽन्योन्याश्रयो वेति वदन्तीति ध्येयम् ।

"**एवञ्चे**"ति । द्रव्यत्वावच्छिन्नजनकताघटितस्य तत्तद्व्यक्तित्वावच्छिन्नजनकता-घटितस्य वा निरुक्तकार्यकारणभावस्याशक्यकल्पनाकत्व इत्यर्थः । तथा च पारिशेष्यात् स्वप्रतियोगिसमवेतत्वसम्बन्धेनैव नाशहेतुताया अवश्यवक्तव्यतया घटत्वस्यापि स्वप्रतियोगि-समवेतत्वेन घटत्वनाशस्यापत्तिर्दुरुद्धरेति समुदितमूलतात्पर्यम् ।

---

1 द्वितीयकल्पानुसरणेन पूर्वकल्पीयप्रतिबन्धकताबाहुल्यं निराकृतम् ।

**भावादेवापत्त्यभावादिति वाच्यम्, जन्यमात्रे कालिकसम्बन्धेन कारणसत्त्वात् प्रतियोगितासम्बन्धेन तादृशनाशापत्तेः।**

---

घटत्वादिजातेर्नाशनिरासार्थं लाघवतः प्रकारान्तरमुपन्यस्यति "**न च तन्नाशस्य कालिकसम्बन्धेन हेतुता प्रतियोगितासम्बन्धेन कार्यं प्रती**"ति। कार्यमत्र नाशः। तथा च प्रतियोगित्वसम्बन्धेन नाशत्वावच्छिन्नं प्रति कालिकसम्बन्धेन नाशस्य कारणत्वमिति कार्यकारणभावः।

घटत्वादौ कालिकसम्बन्धेन नाशरूपकारणाभावान्न घटत्वादिनाशापत्त्यवकाश इत्याह "**घटत्वादौ तेन सम्बन्धेने**"त्यादि। तद् दूषयति "**जन्यमात्रे कालिकसम्बन्धेन कारणसत्त्वादि**"त्यादि। जन्यमात्रस्य कालोपाधित्वमते सर्वत्र जन्ये कालिकसम्बन्धेन नाशरूपकारणसत्त्वादित्यर्थः। अन्यत् सुगमम्।

ननु जन्यमात्रस्य यदा कदाचिन्नाशस्यावश्यम्भावाज् जन्यमात्रस्य नाशापत्तिदानं कथं सङ्गच्छते, अत्र केचिद् वस्तुतः कारणीभूतनाशाद् यादृशो नाश उत्पद्यते तादृशनाशस्यैवान्यत्रापत्तेरिति तादृशनाशापत्ते रितिमूलतात्पर्यात्। तथा च घटनाशाद् यद् रूपं नश्यति, तादृशरूपनाशस्यैवेदानीन्तनपटरूपे प्रतियोगितासम्बन्धेनापत्तिस्तत्र पटरूपे तदानीन्तनघटरूपनाशस्य कालिकेन सत्त्वात् सामग्रीसत्त्वे कार्यमिति नियमादिति भावः। एतेन प्रतियोगिनो विशिष्यहेतुत्वेनेत्याद्यग्रिमग्रन्थस्यापि सङ्गतेरिति वदन्ति। (प्रयियोगित्वसम्बन्धेन नाशं प्रति प्रतियोगिनस्तादात्म्येनापि कारणत्वमिति कार्यकारणभावस्येदानीमनादृतत्वान्निरुक्तमतमिति मन्यामहे।) तन्मतं न युक्तिसहम्, प्रतियोग्यसमभिव्याहृतनाशत्वमात्रस्यैव निरुक्तकार्यताच्छेदकत्वात्तादृशनाशापत्तेरित्यस्य घटरूपनाशापत्तितात्पर्यकत्वानौचित्यात्। कार्यतावच्छेदकमात्रावच्छिन्नस्यैवान्यत्रापत्तिदाननियमात्। अपरे तु तादृश नाशापत्तेरित्यस्य प्रतियोगितासम्बम्धेन नाशत्वेन नाशवैशिष्ट्यापत्ते[1]रित्यर्थकत्वं वर्णयन्ति। बहुकालान्तरितनाशप्रतियोगिनोदानीन्तनघटरूपे नाशत्वेन प्रतियोगितासम्बन्धेन नाशवत्त्वापत्तेः, यस्य कस्यचिन्नाशस्य तदानीमपि कालिकेन सत्त्वादिति ध्येयम्[2]।

---

1 सुदूरभविष्यत कालोत्पन्ननाशस्य प्रतियोगित्वं वर्तमाने वस्तुनि सत्त्वेऽपि प्रतियोगित्वसम्बन्धेन तादृशनाशवैशिष्ट्यं न वर्तते। नाशोत्पादाव्यवहितवस्तुन्येव नाशवैशिष्ट्यमभ्युपगच्छति तत्रभवान् टीकाकृदिति मन्यते।

2 अस्माभिस्तु मन्यते—प्रतियोगित्वसम्बन्धेन नाशं प्रति कालिकेन नाशस्य कारणत्वे ध्वंसान्तर्भावेनान्वयव्यभिचारः प्रागभावान्तर्भावेन व्यतिरेकव्यभिचारश्चेति।

**न च प्रतियोगिनां ( विशिष्ट ) विशिष्य हेतुत्वेन जन्यमात्रस्य नापत्तिरिति वाच्यम्, कालिकसम्बन्धेन नाशस्य हेतुत्वे व्यधिकरणरूपादीनां नाशापत्तिवारणाय रूपादीनामपि तत्तद्व्यक्तित्वेन हेतुत्वे गौरवात्। मन्मते तु स्वप्रतियोगिसमवेतत्वस्य निवेशे व्यधिकरणरूपादेरापत्त्यभावाद् रूपत्वेन रूपनाशं प्रतिहेतुताऽकल्पने लाघवात्। न च प्रतियोगितासम्बन्धेन नाशवन्नाशं प्रति**

---

जन्यमात्रस्य नाशापत्तिवारणार्थमाह "**न च प्रतियोगिनां विशिष्यहेतुत्वेने**"त्यादि। अयमेषामाशयः—प्रतियोगित्वसम्बन्धेन नाशं प्रति कालिकेन नाशस्य कारणत्वमित्येकः सामान्यकार्यकारणभावः, अपरश्च घटरूपत्वाद्यवच्छिन्नं प्रति घटरूपत्वादिना तादात्म्येन घटरूपादेः कारणत्वमिति विशेषः। एवञ्च[1] विशेषसामग्रीसमवहिताया एव सामान्यसामग्र्या कार्यजनकत्वनियमान्न जन्यमात्रस्य नाशापत्तिस्तत्र विशेषसामग्र्यभावात्। एतद्दूषयति "**कालिकसम्बन्धेन नाशस्य हेतुत्व**" इति। "**व्यधिकरणरूपादीनां नाशापत्तिवारणाये**"ति। यत्र तद्घटनाशात्तदीयं रूपं नष्टं घटान्तरीयरूपव्यक्तिश्च न नष्टा तत्र घटान्तरीयरूपव्यक्तेर्नाशवारणायेत्यर्थः स्तत्र रूपत्वावच्छिन्नस्य तादात्म्येन सत्त्वात्। "**रूपादीनामपि तत्तद् व्यक्तित्वेन हेतुत्व**" इति। एवञ्च प्रतियोगितासम्बन्धेन तत्तद्रूपादिव्यक्तित्वावच्छिन्नं प्रति तत्तद्रूपादिव्यक्तित्वेन हेतुत्वात् तद्घटनाशाकालीनतद्रूपव्यक्तेर्नाशासम्भवात्। तत्र तद्घटनाशकालीनतद्रूपव्यक्तेस्तादात्म्येनासत्त्वात्। तदपि दूषयति "**गौरवादि**"ति। तत्तद्व्यक्तिभेदेनानन्तकार्यकारणभावकल्पनायां गौरवादित्यर्थः। तदपेक्षया लाघवमाह "**मन्मते तु स्वे**"त्यादि। मन्मते पूर्वपक्षिमते। स्वप्रतियोगिसमवेतत्वम्बन्धेन नाशस्य कारणत्वे व्यधिकरणरूपादीनां नाशापत्त्यसम्भवाद् घटादिरूपनाशं प्रति घटादिरूपत्वेन कार्यकारणभावाकल्पननिबन्धनं लाघवमाह "**रूपनाशं प्रति हेतुताऽकल्पने लाघवादि**"ति। एवञ्च घटत्वनाशापत्तिस्तदवस्थैव। घटत्वादेर्नाशवारणार्थं प्रकारान्तरमुपन्यस्यति—"**न च प्रतियोगितासम्बन्धेन नाशवन्नाशं प्रती**"त्यादि। प्रतियोगित्वसम्बन्धेनेत्यस्याग्रिमनाशेनान्वयः, नाशवत्त्वञ्च स्वप्रतियोगिसमवेतत्वसम्बन्धेन। एवञ्च स्वप्रतियोगिसमवेतत्वसम्बन्धेन नाशवान् यः प्रतियोगित्वसम्बन्धेन तन्नाशं प्रति

---

१ घटादिगता ये ये जन्यभावा स्तत्तत् प्रत्येकावृत्त्युभयावृत्तिधर्मावच्छिन्नानां प्रतियोगित्वसम्बन्धेन प्रातिस्विकरूपेण नाशं प्रति तेषां प्रत्येकं तादात्म्येन विशिष्यकारणत्वमिति विशेषकार्यकारणभावः।

**स्वप्रतियोगिसमवेतत्व-कालिकविशेषणतैदुभयसम्बन्धेन हेतुत्वान्न घटत्वादेर्नाशापत्तिरिति वाच्यम्, स्वप्रतियोगिसमवेतत्वविशिष्टकालिकसम्बन्धेन, कालिकत्वविशिष्टस्वप्रतियोगिसमवेतत्वसम्बन्धेन वा तस्य निवेश इत्यत्र विनिगमकाभावात्। न च स्वप्रतियोगिसमवेतत्व-कालिकोभयसम्बन्धविषयकापेक्षाबुद्धिव्यक्तेस्तत्तद्व्यक्तित्वेन विशिष्यैतज्ज्ञानविषय इति क्रमेण निवेशान्न विनिगमनाविरहः।**

---

स्वप्रतियोगिसमवेतत्व—कालिकोभयसम्बन्धेन नाशस्य कारणत्वम्। तथा च घटनाशान्न पटरूपस्य नाशापत्तिर्न वा घटत्वनाशस्य चापत्तिः। अत्र प्रतियोगित्वसम्बन्धेन नाशं प्रति स्वप्रतियोगिसमवेतत्व-कालिकोभयसम्बन्धेन नाशस्य कारणत्वकल्पनेनैव सम्यक्त्वे तन्नाशवत्त्वनिवेशप्रयोजनं चिन्त्यम्। दूषयति "**स्वप्रतियोगिसमवेतत्वविशिष्टे**"-त्यादिना। उभयत्वमत्र यद्येकविशिष्टापरत्वं तदा स्वप्रतियोगिसमवेतत्वविशिष्ट-कालिकेन कालिकविशिष्टस्वप्रतियोगिसमवेतत्वेन च सम्बन्धेन विनिगमनाविरहात् कारणताद्वयमवच्छेदकगौरवञ्च स्यात्। विनिगमनामुद्धरति—"**स्वप्रतियोगिसमवेतत्व-कालिकोभये**"त्यादि। उभयत्वमत्र नैकविशिष्टापरत्वम्, अपितवपेक्षाबुद्धिविशेष-विषयत्वमेव, तथा च न विनिगमनाविरह इति भावः। ननु तथात्वेऽप्येकापेक्षाबुद्धिविशिष्टा-परापेक्षाबुद्धिविषयत्वमपरापेक्षाबुद्धिविशिष्टापेक्षाबुद्धिविषयत्वमिति रीत्या पुनर्विनिगमना-विरहतादवस्थ्यमित्याशङ्क्याह-"स्वप्रतियोगिसमवेतत्व-कालिकोभय**सम्बन्धविषयकापेक्षाबुद्धि-व्यक्ते**"रित्यादि। अपेक्षाबुद्धिश्चानेकेष्वेकत्वबुद्धिः। द्वित्वादिसंख्यानां प्रत्यक्षानु-रोधेनापेक्षाबुद्धेस्त्रिक्षणावस्थायित्वमभ्युपगम्यते। तथा चायंक्रमः—द्रव्ययोः सन्निकर्षा-देकत्वत्वनिर्विकल्पकज्ञानम्, ततश्च सन्निकर्षकर्तृपुरुषस्यायमेकोऽयमेक इत्याकारा समूहा-लम्बनात्मिकापेक्षाबुद्धिस्ततः सन्निकृष्टद्रव्ये द्वित्वोत्पत्तिस्तदनन्तरमपेक्षाबुद्धिमतः पुरुषस्य द्वित्वविशिष्टबुद्धिनिर्वाहकं द्वित्वत्वनिर्विकल्पकज्ञानं ततस्तस्य पुरुषस्य द्वित्वत्वविशिष्टद्वित्व-प्रत्यक्षमपेक्षाबुद्धिनाशश्च ततश्च द्वित्वनाशः। अपेक्षाबुद्धेस्त्रिक्षणानवस्थायित्वे स्वोत्पत्ति-तृतीयक्षणे द्वित्वनाशात् कार्यकालवृत्तितया प्रत्यक्षकारणीभूतस्य विषयस्याभावाद् द्वित्व-प्रत्यक्षं नानुपद्येत। नन्वपेक्षाबुद्धीनां त्रिक्षणावस्थायित्वे योग्यविभुसमवेतविशेषगुणानां स्वोत्तरवर्तिविशेषगुणनाश्यत्वनियमो भज्येत इति चेन्न, निरुक्तनियमोट्टङ्कितकार्यकारण-भावस्य स्वत्वघटितत्वेन प्रत्येकव्यक्तिविश्रान्ततयाऽपेक्षाबुद्धिस्थले द्वित्वत्वनिर्विकल्पक-ज्ञानस्यैव तत्र नाशकत्वकल्पनान्नानुपपत्तिरिति। "**तद्व्यक्तित्वेन विशिष्ये**"ति।

**एवमपि तत्समानविषयकानन्तज्ञानव्यक्तिमादाय विनिगमनाविरहात्, मन्मते तु तद्घटसमवेतनाशं प्रति तादृशनाशवन्नाशं प्रति वा तन्नाशस्य स्वप्रतियोगिसमवेतत्वप्रत्यासत्त्या हेतुत्वकल्पनेनैवानतिप्रसङ्गात्। तत्कल्पनासावकाशात्तद्बलाज्जाते नाशापत्तेर्दुर्वारत्वादिति भावः।**

**रूपादीनां रूपत्वादिना हेतुतायां रूपस्य कार्यतावच्छेदकं रूपनाशत्वम्, गन्धनाशत्वम्, रसनाशत्वम्, स्पर्शनाशत्वं वेत्यत्र विनिगमकाभावात् कार्यकारणभावचतुष्टयं स्यात्।**

---

तद्व्यक्तित्वञ्च स्वप्रतियोगिवृत्तित्व—स्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यत्वमतो नाननुगमः।

अपेक्षाबुद्धेर्विशिष्य हेतुत्वकल्पनेन विनिगमनाशङ्कानिरासेऽपि तत्समनियतानन्तज्ञानव्यक्तिमादाय पुनर्विनिगमनाविरहतादवस्थ्यमाह "**एवमपी**"ति। अपेक्षाबुद्धेर्विशिष्य हेतुत्वेऽपीत्यर्थः।

एतावता स्वप्रतियोगिसमवेतत्व—कालिकोभयसम्बन्धेन पूर्वोक्तस्य नाशस्य कारणत्वकल्पनासम्भवात् स्वप्रतियोगिसमवेतत्वसम्बन्धेनैव नाशकारणत्वस्य वक्तव्यतया घटत्वस्य नाशापत्तिरित्याह "**मन्मते त्वि**"त्यादि। जातेर्नाशापादनकर्तृ पूर्वपक्षिमते इत्यर्थः। एवञ्च जातेर्नाशापत्तिवारणार्थं ध्वंसं प्रति जन्यभावत्वेन कारणत्वकल्पनमावश्यकमिति भावः।

ननु जन्यभावत्वेन कारणत्ववादिना यथा व्यधिकरणरूपादीनां नाशापत्तिवारणाय रूपादिनाशं प्रति रूपादित्वेन कारणत्वं प्रकल्प्यम्, तथा अस्माभिरपि स्वप्रतियोगिसमवेता नाशप्रतियोगिनो ये ये, तन्नाशं प्रति तेषां प्रत्येकं कारणत्वं कल्प्यम्—यथा प्रतियोगित्वसम्बन्धेन रूपनाशं प्रति तादात्म्येन रूपस्य, रसनाशं प्रति तादात्म्येन रसस्य, गन्धनाशं प्रति तादात्म्येन गन्धस्य, स्पर्शनाशं प्रति तादात्म्येन च स्पर्शस्य। एवञ्च स्वप्रतियोगिसमवेतत्वसम्बन्धेन नाशकारणसत्त्वेऽपि निरुक्तविशेषकारणविरहेण सामग्र्यभावात् कथं घटत्वनाशापत्तिरित्यन्तर्गूढाशङ्कासमाधानाय गौरवात्तादृशतादृशकारणताया अशक्यकल्पनाकत्वमाह— "**रूपादीनां रूपत्वादिना हेतुतायां रूपस्य कार्यतावच्छेदकं रूपनाशत्वं गन्धनाशत्व**"मित्यादि। हेतुतायामित्यत्र सप्तम्यर्थो निरूपितत्वं, रूपस्येति षष्ठ्यर्थो निष्ठत्वम्, तथा च रूपनिष्ठहेतुतानिरूपितकार्यतावच्छेदकमिति समुदितबोधः।

अयमेवाशयः — समनियताभावानामैक्यादेकाश्रितरूपरसगन्धादिप्रतियोगिकनाशानामैक्यात्तादात्म्यसम्बन्धावच्छिन्नरूपत्वावच्छिन्नकारणतानिरूपितप्रतियोगित्वसम्बन्धावच्छिन्न-

**तेषां समनियततया एकस्यैव ध्वंसस्योपादानात्। एवं रसादीनां त्रयाणामपि प्रत्येकं चतुष्टयमिति, एवं संख्यापरिमाणादीनामपीति महद्गौरवं स्यात्।**

---

कार्यतावच्छेदकं यथा रूपनाशत्वं तथा विनिगमनाविरहाद्रसनाशत्वं गन्धनाशत्वं स्पर्शनाशत्वमपि। एवञ्च रूपनाशं प्रति रूपत्वेन, रसनाशं प्रति रूपत्वेन, गन्धनाशं प्रति-रूपत्वेन, स्पर्शनाशत्वावच्छिन्नं प्रत्यपि रूपत्वेनेति रीत्या कार्यकारणभावचतुष्टयम्। एवं रसनाशं प्रति रसत्वेन कारणतायां कार्यतावच्छेदकं रसनाशत्वम्, रूपनाशत्वम्, गन्ध-नाशत्वम्, स्पर्शनाशत्वञ्चेति कार्यकारणभावचतुष्टयम्।

गन्धनाशं प्रति गन्धत्वेन कारणतास्थले स्पर्शनाशं प्रति स्पर्शत्वेन कारणतास्थलेऽपि प्रत्येकं कार्यकारणभावचतुष्टयम्। एवञ्च षोढ़शधा कार्यकारणभावा आपद्येरन्। इदमुपलक्षणम्—रूपादौ रसादिनाशापत्तिश्च द्रष्टव्या। समनियतानां संख्यापरिमाणादीनामप्येवं रीत्या कार्य-कारणभावकल्पनायां महद्गौरवमाह "**एवं संख्यापरिमाणादीनामपी**"ति। आदि-पदेन रूपादिसमनियतसंयोगविभागादीनामन्येषाञ्च समनियतगुणानां संग्रहात् कार्यकारण-भावानन्त्यम्, एवञ्च निरुक्तगौरवभिया रूपादिध्वंसं प्रति रूपादित्वेन, संयोगादिध्वंसं प्रति च संयोगादित्वेन कारणत्वकल्पनाया अशक्यत्वेन घटत्वादिनाशापत्तिरशक्यपरिहारेति भावः।

ननु प्रतियोगित्वसम्बन्धेन रूपनाशं प्रति तादात्म्येन रूपत्वेन कार्यकारणभावकल्पने नित्यरूपस्यापि ध्वंसापत्तिः। [1]नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भाव इति नियमात्। तथाहि नियमश्च व्याप्तिः। निरूक्तव्याप्तिशरीरञ्च यत् नित्यत्वे सति कारणतावच्छेदक धर्म्मवत् तत्फलो[2]पधायकमिति। फलानुपधायके अरण्यस्थदण्डादौ व्यभिचारवारणाय नित्यत्वे सतीति, इति चेन्न, निरूक्तव्याप्तावप्रयो[3]जकत्वात्। न च तथापि रूपत्ववति नित्यरूपे कार्यासत्त्वादन्वयव्यभिचारः, अन्वयव्यभिचारस्याप्यन्यथासिद्धमुद्रया कारणत्व-

---

1 'नित्यस्य स्वरूपयोग्यत्वे' इत्यादि—स्वरूपयोग्यत्वे कारणतावच्छेदकधर्मवत्त्व इत्यर्थः। कारणतावच्छेदकधर्मवतो नित्यस्य कार्यनियतपूर्ववर्तितावत्त्वादनन्यथासिद्धत्वाच्च कारणतालक्षणाक्रान्तत्वादित्यापत्तिकारिणामाशयः।

2 फलोपधायकत्वं फलविशिष्टत्वमित्यर्थः, वैशिष्ट्यञ्च स्वाव्यवहितपूर्ववर्तित्व-स्व-सामानाधिकरण्य—स्वनिरूपितान्यथासिद्धिशून्यत्वैतत्त्रितयसम्बन्धेन।

3 अप्रयोजकत्वात्—अनुकूलतर्कविरहादित्यर्थः।

**अपि तु तत्तत्संयोगादौ रूपादिनाशापत्तिवारणाय तत्तत्संयोगाद्यन्य प्रतियोगिकनाशं प्रति तत्तद्भेदत्वादिना हेतुत्वकल्पनात्। तत एव संयोगादिव्यक्तौ रूपादिनाशापत्तिवारणसम्भवात्। तन्नाशस्य तत्तत्संयोगान्यप्रतियोगिकत्वेन तत्तत्संयोगभेदरूपकारणविरहात्। इत्थञ्च तादृशभेदरूपविशेषकारणस्यापि घटत्वादौ सत्त्वात्तन्नाशापत्तिर्दुर्वारैव।**

---

विघटकत्वादिति वाच्यम्, अन्वयव्यभिचारग्रहस्य ग्राह्यमुद्रया व्याप्तिग्रहाप्रतिबन्धकत्वेन कारणताविघटकत्वानङ्गीकारात्। वस्तुतस्तु प्रतियोगित्वसम्बन्धेन रूपध्वंसं प्रति जन्यरूपत्वेनव कार्यकारणभावकल्पनान्नानुपपत्तिः। जन्यरूपत्वञ्च सामानाधिकरण्यसम्बन्धेन जन्यताविशिष्टरूपत्वम्, एतेन ध्वंसकारणत्वाभाववति नित्यरूपे रूपत्वस्य वृत्तित्वेन 'न ह्यतिप्रसक्तमवच्छेदक'मिति सिद्धान्तात् कथं रूपत्वस्य निरुक्तकारणतावच्छेदकत्वमित्याक्षेपोऽपि निरस्तः।

ननु तादृशकार्यकारणभावकल्पनाया अशक्यत्वे रूपादिसमनियतसंयोगादौ रूपादिनाशस्यापत्तिः कथं वारणीयेत्याशङ्कायामाह **"अपि तु तत्तत्संयोगादा"**विति।

अत्रेदमवधातव्यं—यादृशसंयोगविशेषरूपविशेषयोः समनैयत्यं तत्तदभावयोरपि सुतरां तथा, तत्रैव संयोगविशेषरूपविशेषनाशवारणार्थं निरुक्तकार्यकारणभावस्यावश्यकत्वम्। अन्यत् सुगमम्। **"इत्थञ्चे"**ति। विशेषकार्यकारणभावमप्रकल्प्य संयोगान्यप्रतियोगिकध्वंसं प्रति संयोगविशेषभेदस्य कारणत्वकल्पनेनेत्यर्थः। अत्रेदं विविच्यते, समनियतानामभावानामैक्येऽपि तत्तद्ध्वंसीया प्रतियोगिता विभिन्नैवेति। रूपध्वंसीया प्रतियोगिता रूपनिष्ठा, रसादिध्वंसीया प्रतियोगिता रसादिनिष्ठैव, न तु तदन्यनिष्ठा। एवञ्च तादृशविलक्षणप्रतियोगित्वसम्बन्धेन रूपध्वंसं प्रति रूपत्वेन रसादिनाशं प्रति विलक्षणप्रतियोगित्वसम्बन्धेन रसादित्वेन संयोगादिनाशं प्रति संयोगादित्वेन कार्यकारणभावकल्पने विनिगमनाविरहप्रयुक्तं न पूर्वोक्तं महद्गौरवं न वा संयोगान्यप्रतियोगिकनाशं प्रति संयोगभेदस्य गुरुशरीरस्य कारणत्वकल्पनस्यावश्यकत्वम्, रूपादिनाशस्य विलक्षणप्रतियोगित्वसम्बन्धेन रूपादावेव [1]सत्त्वादिति ध्येयम्। वस्तुतस्तु प्रतियोगिताया-

---

1 प्रतियोगिताया अवैलक्षण्ये समनियतध्वंसीयप्रतियोगिताया विभागसाधारण्येन निरुक्तकार्यकारणभावबलात् प्रतियोगित्वसम्बन्धेन संयोगध्वंसस्य विभागादौ, विभागध्वंसस्य संयोगादावापत्तिवारणेऽपि तत्र विभागः संयोगध्वंसप्रतियोगी, संयोगो विभागध्वंसप्रतियोगीत्यादिव्यवहारोऽपि दुरुद्धरः।

**न च संयोगादीनां विशिष्य हेतुत्वं माऽस्तु, रूपान्यप्रतियोगिकध्वंसं प्रति रूपभेदत्वेन हेतुतेत्यपि कथं नोच्यतामिति वाच्यम्, तथा सति रूपादीनां चतुर्णामेकध्वंसासम्भवात्। तत्तद्रूपान्यप्रतियोगिकत्वस्यापि सत्त्वात्। रूपाभेदात्मककारणविरहेण तदापत्त्यसम्भवात्।**

---

वैलक्षण्यास्वीकारे प्रकृतेऽप्यनुपपत्तिः। समनियतानामभावानामैक्याद्रूपान्यप्रतियोगिकध्वंसस्य प्रतियोगित्वसम्बन्धेन रूपेऽपि सत्त्वात् तत्र रूपभेदासत्त्वाद् व्यभिचारादिति।

पूर्वं समनियतानामभावानामैक्याद् रूपादिनाशं प्रति रूपादित्वेन कारणत्वकल्पनं महागौरवभिया रूपादौ रसादिनाशापत्तिभिया च परित्यक्तम्। इदानीं तद्गौरव-जिहीर्षामुखेन प्रकारान्तरमुपन्यस्य घटत्वादेर्नाशमापादयितुमुपन्यस्यति "**न च संयोगादीनां विशिष्य हेतुत्वं माऽस्तु रूपान्यप्रतियोगिके**"त्यादि। गौरवभिया समनियत-संयोगविशेष-रूपादिविशेषस्थले संयोगविशेषे रूपादिविशेषनाशापत्त्या च प्रतियोगित्व-सम्बन्धेन संयोगनाशं प्रति संयोगभेदस्य कारणत्वकल्पनं माऽस्त्वित्यर्थः। संयोगान्य-प्रतियोगिकनाशं प्रति संयोगभेदस्य कारणत्वकल्पनेनैव संयोगादौ रूपनाशो नापद्येत इति भावः।

"**रूपान्ये**"त्यादि। यथा संयोगान्यप्रतियोगिकनाशं प्रति संयोगभेदस्य कारणत्वं तथा समनियतानां रूपादीनामपि प्रतियोगित्वसम्बन्धेन रूपान्यप्रतियोगिकनाशं प्रति रूपादिभेदस्य कारणत्वं कथं न कल्प्यताम्? तेनैव कल्पनेन रूपादौ रसादिनाशस्य रसादौ च रूपादिनाशस्य नापादनम्, न वा कार्यकारणभावानां षोडशधा[1] प्रसक्तिरिति भावः। दूषयति—"**तथा सती**"ति। रूपादिभेदस्य कारणत्वे सतीत्यर्थः। "**रूपादीनां चतुर्णामेकध्वंसासम्भवा**"दिति। एकध्वंसासम्भवे हेतुमाह "**तत्तद्रूपान्य-प्रतियोगिकत्वस्यापि सत्त्वा**"दिति।

अत्रायमाशयः—रूपान्यप्रतियोगिकत्वमत्र रूपप्रतियोगिकान्यत्वम्, तथाचैकस्मिन् रूपादिध्वंसे परस्परविरुद्धयो रूपप्रतियोगिकत्व-रूपप्रतियोगिकान्यत्वयोः सत्त्वासम्भवान्न रूपादिध्वंसानामैक्यसम्भवः। एवञ्च रूपादिध्वंसानामैक्यासम्भवे रूपादिनाशं प्रति रूपादित्वेन कारणत्वकल्पनेऽपि पूर्वोक्तस्य विनिगमनाविरहस्यासम्भवान्निर्बाधं कल्पितस्य

---

१ 'षोडशधा' इत्युपलक्षणम्। न वा कार्यकारणभावानामानन्त्यप्रसक्तिः। आनन्त्यञ्च समनियतरूपरसगन्धस्पर्शशब्दैकत्वादिसंख्यापरिमाणसंयोगविभागादिभेदादिति।

**न चैवं समनियतदेशकालानामेकस्यैव ध्वंसस्योत्पादात्तत्र व्यभिचारस्तस्य तत्तत्संयोगान्यप्रतियोगिकतया तत्तत्संयोगे तत्संयोगभेदात्मककारणविरहादिति वाच्यम्, यत्र तादृशव्यक्तीनां व्यक्त्यन्तरमादायैको ध्वंसस्तत्र तेन रूपेण हेतुत्वाकल्पनात्। रूपादिध्वंसस्य संयोगविभागयोरापत्तिवारणाय संयोगभेदत्वेन कारणताऽपि दुष्कल्प्यते। [हेतुताद्वयं कल्प्यते।]**

---

तादृशविशेषकारणस्याभावादेव न घटत्वनाशापत्तिः। रूपप्रतियोगिकत्व-रूपप्रतियोगिकान्यत्वयोः परस्परविरुद्धत्वात् समनियताभावानामैक्यासम्भवात् निरस्तनिरुक्तविनिगमनाशङ्कायां प्रतियोगित्वसम्बन्धेन रूपादिध्वंसं प्रति तादात्म्येन रूपादित्वेनावधारितकारणत्वे रसादावपि न रूपध्वंसापत्तिरिति प्रयोजनान्तरञ्च दर्शयति—"**रूपाभेदात्मके**"ति। रसादौ तादात्म्येन रूपाद्यभावादेव न रसादौ रूपनाशापत्तिरिति समुदितग्रन्थतात्पर्यम्।

समनियतदेशकालानामेकमेव ध्वंसं व्युत्पाद्य पुनर्व्यभिचारमाशङ्कते—"**न चैव**"-मित्यादिना। समनियेता देशाः कालाश्च येषां 'तत्तत्समनियतदेशकालप्रतियोगिकस्यैकस्यैव ध्वंसस्योत्पादाद्व्यभिचारः। अत्रायं भावः—रूपान्यप्रतियोगिकत्वम्, न रूपप्रतियोगिकान्यत्वम्, अपि तु रूपान्या ये ये. तत्तत्प्रतियोगिकत्वमेव, यद्धर्मावच्छिन्नवाचकपदादन्यादिपदं श्रूयते, तद्धर्मावच्छिन्नस्यैव भेदबोधकत्वनियमात्, न हि घटान्य पट इत्यादौ पटभेदप्रतीतिः कस्यापीति। व्यभिचारं स्फुटयति "**तस्य तत्तत्संयोगान्यप्रतियोगिकतये**"त्यादि। तस्य ध्वंसस्य, एकाश्रितानामनेकसंयोगव्यक्तीनां समनियतदेशकानां ध्वंसस्यैक्यात्तस्य च नानासंयोगव्यक्तिप्रतियोगिकतया यत् किञ्चित् संयोगव्यक्तौ व्यक्त्यन्तरसंयोगव्यक्ते ध्वंसस्य प्रतियोगित्वसम्बन्धेनापत्तिवारणाय तत्तत् संयोगान्यप्रतियोगिकध्वंसं प्रत्यपि तत्तत्संयोगभेदस्य कारणत्वं कल्पनीयम्। अत्र तत्तत्संयोगपदेन तत्तद्रूपादेरप्युपलक्षणं बोद्धव्यम्। एवञ्च तादृशैकध्वंसस्य विनिगममनाविरहात् चालनीयन्यायेन प्रत्येकं तत्तत्संयोगान्यप्रतियोगिकत्वस्य स्वीकार्यत्वेन तत्संयोगेभेदविरहिणि तत्संयोगेऽपि प्रतियोगित्वसम्बन्धेन तादृशध्वंससत्त्वेन व्यभिचार इति भावः। व्यभिचारमुद्धरति "**यत्रे**"त्यादि "**हेतुत्वाकल्पना**"दित्यन्तेन। तत्संयोगान्यप्रतियोगिकध्वंसं प्रति तत्संयोगभेदस्य कारणता-

१ पूर्वं समनियतानां सर्वेषामभावानामैक्यप्रदर्शनेनापत्तिदर्शिता, इदानीन्तु येषामधिकरणानि देशाः कालाश्च तुल्यास्तेषां ध्वंसानामेवैक्यमित्ययं कल्पस्यास्य विशेषः। तेनैकाश्रिता अपि संयोगव्यक्तयो यदि भिन्नकालीनास्तत्तत्प्रतियोगिकध्वंसानामत्रकल्पेनैक्यमिति भावः।

**अन्ये तु घटवृत्त्येकाश्रितगुणानां घटनाशोत्तरमेकस्यैव नाशस्याभ्युपगमात्तेषां परस्मिन् परस्परस्योत्पत्तिविषयत्वात्तद्वारणाय तेषां तत्त्वेन हेतुत्वकल्पनादिति। तन्न, रूपनाशत्वं रसनाशत्वं वा कार्यतावच्छेदकमित्यत्र विनिगमना-**

---

न प्रकल्प्या, कल्पनीयन्तु रूपादिध्वंसस्य रूपादिसमनियतसंयोगविभागयोरापत्तिवारणाय सामान्यतः संयोगान्यप्रतियोगिकभेदं प्रति संयोगभेदस्य विभागान्यप्रतियोगिकध्वंसं प्रति च विभागभेदस्य कारणताद्वयम्। तथा च तत्तत्संयोगव्यक्तिभेदभिन्नकारणत्वाकल्पनेन न पूर्वोक्तव्यभिचाराशङ्केति भावः।

ननु तादृश कार्यकारणभावास्वीकारे एकाश्रितानेकसंयोगव्यक्तिस्थले तत्संयोगध्वंसस्यापरसंयोगे आपत्तिः कथं वारणीयेति न शङ्क्यम्, तत्तत्संयोगव्यक्तिमन्तर्भाव्य तादृशातिविशेषकार्यकारणभावाकल्पनात्। तत्तद्रूपाद्यन्यप्रतियोगिकध्वंसं प्रति तत्तद्रूपादिभेदत्वेन तत्संयोगान्यप्रतियोगिकध्वंसं प्रति च तत्तत्संयोगभेदस्य कारणत्वनिर्वचनादेव तदाशङ्कानवकाशदिति ध्येयम्। पूर्वं समनियताभावानामैक्यमते रूपरसादिध्वंसानामनेकेषां समनैयत्येनैक्यात् प्रतियोगित्वसम्बन्धेन रूपध्वंसस्य रसे, रसादिध्वंसस्य रूपे आपत्तिवारणाय रूपध्वंसं प्रति रूपत्वेन, रसध्वंसं प्रति रसत्वेन कार्यकारणभावस्वीकारे विनिगमनाविरहात् कार्यकारणभावानां षोडशधा आपत्तिर्दर्शिता। इदानीन्त्वेकाश्रितरूपरसादिप्रतियोगिकमेकमेव ध्वंसमङ्गीकर्तॄणां केषाञ्चिन्मतमाह **"अन्ये त्वि"**त्यादिना। तेषां मतपरिस्कारार्थमाह—**"परस्मि"**न्नित्यादि **"हेतुत्वकल्पना"**दित्यन्तेन।

रूपरसादीनामेकस्यैव ध्वंसस्याङ्गीकारे रूपादिध्वंसस्यापि रसादिष्वापत्तिवारणाय तत्त्वेन हेतुत्वकल्पनादिति। प्रतियोगित्वसम्बन्धेन रूपध्वंसं प्रति तादात्म्येन रूपत्वेन, रसध्वंसं प्रति च तथा रसत्वेन कारणत्वकल्पनादित्यर्थः।

तन्मतं दूषयति **"तन्ने"**त्यादिना। **"रूपनाशत्व"**मित्यादि। एकस्यैव ध्वंसस्य स्वीकर्तृमतेऽपि विनिगमनाविरहात् पूर्ववत् षोडशकार्यकारणभावानामापत्तिस्तदवस्थैवेति भावः।

अधिकन्तु प्रतियोगित्वसम्बन्धेन रूपनाशस्य रसे, रसनाशस्य च रूपे आपत्तिर्द्रष्टव्या। अत्रापि पूर्ववदिदमवधेयम्।

ध्वंसस्यैकत्वेऽपि ध्वंसीया प्रतियोगिता रूपादिनिष्ठा विभिन्नैव, रूपनिष्ठा प्रतियोगिता न रसादिनिष्ठा, एवञ्च तादृशविलक्षणप्रतियोगित्वसम्बन्धेन रूपनाशं प्रति तादात्म्येन रूपत्वेन कारणत्वकल्पने न काप्यनुपपत्तिरित्यवधेयम्। प्रतियोगित्वञ्च "अभावाभावत्व-

**विरहस्य दुर्वारत्वात्। केचित्तु—असंयुक्तद्रव्यस्थले तद्घटनाशजन्यतद्घट-समवेतरूपादीनां नाशः स्वीक्रियते, अधिकदेशवृत्तिसंयोगविभागयोस्तत्तद्-द्रव्येऽसत्त्वात्। अन्येषान्तु—तत्समवेतानामसमवेतानाञ्च समनियतदेश-**

---

मि''ति प्राचीनाः। तथाचाचार्याः—''अभावविरहात्मत्वं वस्तुनः[1] प्रतियोगिते''ति। नव्याश्च केचित्—''सा प्रतियोग्यभावोभयात्मिका''। बौद्धनैयायिकैश्च''अभावात्मिके''त्यन्यदेतत्। नव्यैश्च नैयायिकैर्वृत्तिनियामकत्वेन प्रतियोगिता व्यवह्रियते।

कुसुमाञ्जलावाचार्यपादैरप्यभावस्यालोचनज्ञानवारणाय 'विशेषणस्य प्राग्ग्रहणा'-दित्युक्त्या प्रतियोगित्वस्य विशेषणतावच्छेदकसंसर्गत्वमङ्गीकृतमित्यवधारयामः। तथाहि 'विशेषणस्य' अभावविशेषणस्येत्यर्थः। अभावविशेषणं हि प्रतियोग्येव। एतेन तत्र प्रतियोगित्वातिरिक्तस्य सम्बन्धस्य विशेषणतावच्छेदकसंसर्गत्वासम्भवात् प्रतियोगिताया एव विशेषणतावच्छेदकसंसर्गत्वमनायत्या सिद्धम्। षड्दर्शनटीकाकृद्भिर्वाचस्पतिमिश्रैरपि न्याय-वार्त्तिकतात्पर्यटीकायां तथैवाभिहितम्। चिन्तामणिकारैरपि सामान्यलक्षणायां सयुक्तिक-मुपपादितमेतत्। तन्न्यायनयज्ञैर्विदितमेव, अतस्तन्न प्रपञ्चितमिति।

क्वचित् संयोगनाशाद् गुणनाशः, क्वचिच्च द्रव्यनाशादेव तद्गतगुणनाश इति मत-वादिनां केषाञ्चिन्मतमाह—''**केचित्त्वि**''त्यादिना। ''**तद्घटनाशजन्यतद्घटसमवेत-रूपादीनां नाश**'' इति। अत्र तदघटनाशजन्यतद्घटसमवेतरूपादिनाश इत्यर्थः। संयुक्तद्रव्यस्थले संयोगनाशात् संयुक्तद्रव्यनाशः द्रव्यनाशाद् रूपादिनाश इति तन्मतनिष्कर्षः।

अत्रेदं चिन्तनीयम्—परमाणुद्वयसंयोगेन द्व्यणुकमुत्पद्यते, द्व्यणुकत्रयस्य परस्पर-संयोगेन त्र्यणुकमित्यादिरीत्या घटोत्पत्तिः, कपालकपालिकासंयोगमप्यपेक्षते, एवञ्च घटोऽपि संयुक्तद्रव्यतया कथं नाङ्गीकर्तव्यः। यद्यपि न्यायमतेऽवयवादतिरिच्यत एवावयवी न त्ववयवनिष्ठसयोगस्यावयविगतत्वम्, तथाप्यवयवसंयोगनाशाद्घटनाशस्तन्नाशाच्च तद्गतरूपादीनां नाशः। संयुक्तद्रव्यनाशस्यापि प्रयोजकत्वं संयोगनाशस्येति ध्येयम्[2]।

''**अन्येषान्त्वि**''ति। एतन्मते तत्समवेतत्वस्थले तत्समनियतत्वमेव कार्यतावच्छेदकम्।

---

1 वस्तुन इति षष्ठ्यर्थो निष्ठत्वम्, अन्वयश्चास्य प्रतियोगितायाम्। अभाव-विरहात्मत्वमभावाभावत्वम्। तथाच वस्तुनिष्ठप्रतियोगित्वमभावाभावत्वमिति पर्यवसितम्।

2 त्रितन्तुकपटस्थलेऽपि संयोगनाशात् पटनाशः, पटनाशाद्रूपनाश इत्यपि द्रष्टव्यम्।

**कालत्वात्। इत्थञ्च तद्वारणाय नाशं प्रति जन्यभावत्वेन हेतुतास्वीकार आवश्यकः।**

**न च तद्घटसमवेतसंयोगनाशस्थले तत्समानाधिकरणरूपादावापत्ति-वारणाय नाशं प्रति प्रतियोगिनस्तत्त्वेन, रूपादिनाशं प्रति च रूपादित्वेन हेतुत्वमावश्यकम्, तथाच तादृशविशेषसामग्रीविरहेणैव घटत्वनाशापत्ति-वारणमिति वाच्यम्, रूपनाशस्य कारणतावच्छेदकत्वं यथा रूपत्वस्य तथा रसत्वादीनामपीति गौरवभिया तादृशकार्यकारणभावस्य पूर्वमेव स्वहस्तित-त्वात्। तथापि संयोगस्य तत्त्वेन हेतुतास्वीकारात्, रूपनाशस्य संयोगे उत्पादवारणाय रूपादिप्रतियोगिकनाशं प्रति रूपादित्वेन च कारणत्वमित्यनु-गतरूपेण हेतुत्वादेवानतिप्रसङ्गात्।**

---

"**इत्थञ्चे**"ति। असमवेतानामपि समनियतदेशकालकत्व इत्यर्थः। तत्र कार्यकारणभावश्च स्वप्रतियोगिसमनियतत्वसम्बन्धेन नाशवान् यः प्रतियोगित्वसम्बन्धेन तन्नाशं प्रति स्वप्रतियोगिसमनियतत्वसम्बन्धेन नाशस्य कारणत्वमिति तेषामाशयः। "**तद्वारणाय**" घटत्वनाशवारणायेत्यर्थः।

पुनराशङ्कते—"**न च तद्घटसमवेतसंयोगनाशस्थल**" इति। "**तत्समानाधि-करणरूपादा**"विति। संयोगसमानाधिकरणरूपादावित्यर्थः। "**आपत्तिवारणाये**"ति प्रतियोगित्वसम्बन्धेन संयोगनाशापत्तिवारणायेत्यर्थः। "**प्रतियोगिनः**" संयोगस्य। "**तत्त्वेन**" संयोगत्वेन। "**अनतिप्रसङ्गात्**" प्रतियोगितासम्बन्धेन संयोगे रूपनाशस्य, रूपे च संयोगनाशस्यापादनवारणात्। एवञ्च तादृशविशेषसामग्रीविरहादेव न घटत्व-नाशापत्तिः कृतं जन्यभावत्वेन कारणत्वकल्पनयेत्याह—"**तथाच तादृशविशेष-सामग्रीविरहेणैवे**"ति। निरुक्तं गौरवं परिहृत्य विशेषकार्यकारणभावं प्रकल्प्य संयोगे रूपनाशादिरूपातिप्रसङ्गं वारयति "**तथापि संयोगस्य तत्त्वेने**"त्यादि "**हेतुत्वा देवानतिप्रसङ्गा**"दित्यन्तेन।

अत्रायं भावः—समनियतानां रूपादिध्वंसानामैक्येऽपि तत्प्रतियोगित्वानां विभिन्नतया रूपध्वंसीया प्रतियोगिता रूपनिष्ठा न तु रसनिष्ठा, रसध्वंसीया प्रतियोगिता च रसनिष्ठैव न त्वन्यनिष्ठा, एवञ्च तत्र तत्र तादृशविलक्षणप्रतियोगित्वसम्बन्धेन तत्तन्नाशं प्रति तादात्म्येन रूपत्वादिना कारणत्वमित्येवं रीत्या कार्यकारणभावकल्पने विनिगमनाविरहान्न

**[केचित्तु] न च प्रतियोगिन एवं क्रमेण हेतुत्वे घटत्वादिस्थले विशिष्य हेतुत्वाकल्पनादेव न जातिनाशापत्तिरिति वाच्यम्, यत्र घटसमवेतत्वेन रूपादीनां नाशस्तत्र तत्समवेतनाशत्वेन तत्समवेतत्वेन प्रतियोगिना कार्यकारणभावकल्पनात्तद्बलाज्जातिनाशापत्तिरित्याहुः[1]। तत्समवेतानां नाशस्य लाघवेनैकहेतुत्वकल्पनात्। यत्र वा संयोगनाशाद्घटनाशसम्भवस्तत्र तत्प्रतियोगिसमवेतत्वेन गुणादीनां नाशं प्रति स्वप्रतियोगिसमवेतत्वप्रत्यासत्या समवायिनाशस्य हेतुत्वकल्पने तद्रूपप्रतियोगिकनाशस्य घटत्वे आपादनसम्भवात्, रूपादेस्तत्र विशिष्य हेतुत्वाकल्पनात्।**

---

कार्यकारणभावबाहुल्यं न वा संयोगे रूपनाशस्य संयोगनाशस्य रूपादावापत्तिरिति निर्गलितार्थः। इदञ्च प्रतियोगिताया वैलक्षण्यमतमङ्गीकृत्याभिहितम्[2]।

ध्वंसं प्रति जन्यभावस्य कारणत्वकल्पनस्यानावश्यकत्वमाशङ्कते—"**न च प्रतियोगिन एवं क्रमेण हेतुत्व**"इत्यादिना। "एवं क्रमेण" प्रतियोगित्वसम्बन्धेन रूपादिध्वंसं प्रति तादात्म्येन रूपादित्वेन कारणत्वकल्पनेनेत्यर्थः। तथा च घटादिसमवेतान् सर्वान् जन्यानन्तर्भाव्य कल्पितानां तादृशविशेषकार्यकारणभावानां तत्रासम्वलनाद् घटत्वनाशस्य कारणान्तराकल्पनाच्च न घटत्वनाशापत्तिरिति भावः। जन्यभावस्य कारणत्वकल्पनस्यावश्यकत्वमिति समाधत्ते—"**यत्र घटसमवेतत्वेन रूपादीनां नाश**" इत्यादिना। घटसमवेतस्य प्रतियोगित्वसम्बन्धेन नाशत्वावच्छिन्नं प्रति तादात्म्येन घटसमवेतत्वेन कारणत्वकल्पनाद्घटत्वस्यापि घटसमवेतत्वेन घटत्वनाशापत्तिरित्याशयः। "**तत्समवेतत्वेने**"ति। अत्र तृतीयार्थो वैशिष्ट्यम्, अन्वयश्चास्य प्रतियोगिना। तथा चात्र घटसमवेतत्वावच्छिन्नस्य प्रतियोगित्वसम्बन्धेन नाशं प्रति घटसमवेतत्वावच्छिन्नस्य तादात्म्येन कारणत्वमिति निष्कृष्टकार्यकारणभावो ग्रन्थकृदभिप्रेतः।

न च तत्र सामान्यसामग्रीसत्त्वेऽपि रूपादिनाशं प्रति रूपादित्वेनेत्यादिविशेषसामग्रीविरहाद्विशेषसामग्रीसमवहितसामान्यसामग्र्यैव कार्यजननात् कथं घटत्वनाशा-

---

1 मूलकृता प्रतियोगिताया वैलक्षण्यास्वीकारेऽपीदानीं वैलक्षण्यं स्वीकृत्यैव 'केचित्तु' जातिनाशं वारयितुमिदमुपन्यस्य तददूषितवन्त 'आहु'रित्यन्तेन।

2 मतमिदमन्येषां न तु मूलकृताम्।

**अतो जन्यभावत्वेन हेतुत्वमावश्यकम्। न च स्वप्रतियोगिजन्यत्वसम्बन्धेन द्रव्यनाशविशिष्टद्रव्यसमवेतनाशं प्रति स्वप्रतियोगिजन्यत्वसम्बन्धेन द्रव्यनाशस्यानुगतरूपेण हेतुताऽस्तु, तत्त्वेनैव तद्वारणं भविष्यतीति वाच्यं स्वत्वस्यैक्याभावादिति।**

**ननु तथापि भावत्वनिवेशो विफल इति, न च जन्यत्वावच्छिन्नरूपसामान्यकारणवलाद् ध्वंसनाशापत्तिवारणाय तदिति वाच्यम्, सामान्यसामग्री विशेषकारणमादाय फलजनिका, तथाच तदभावादेव नापत्तिरिति। न च**

---

पत्तिरित्यौचित्यावर्जिताया आशङ्कायाः समाधानार्थमाह—"**तत्समवेतानां नाशस्य लाघवेनैकहेतुत्वकल्पना**"दिति। "एकहेतुत्वकल्पनाद्" एकस्यैव हेतुत्वस्य कल्पनादित्यर्थः। एवकारेण विशेषकारणानाञ्च व्यवच्छेदः। निरुक्तसामान्यकार्यकारणभावेनैव कार्योत्पत्तौ तादृशविशेषसामग्रीकल्पनाया अनावश्यकत्वमिति समाधातुराशयः। प्रकारान्तरेण जन्यभावस्य कारणत्वकल्पनस्यावश्यकत्वं स्फुटयति "**यत्र वे**"त्यादि **जन्यभावत्वेन हेतुत्वमावश्यक**"मित्यन्तेन। "**तत्प्रतियोगिसमवेतत्वेने**"ति तस्य नाशस्य प्रतियोगिनो ये तत्समवेतत्वेनेत्यर्थः। तथाच स्वप्रतियोगिसमवेतत्वावच्छिन्नानां प्रतियोगित्वसम्बन्धेन नाशं प्रति स्वप्रतियोगिसमवेतत्वसम्बन्धेन घटनाशस्य हेतुत्वकल्पनात् स्वप्रतियोगिसमवेतत्वावच्छिन्नस्य घटत्वस्य नाशापत्तिनिरासार्थं जन्यभावत्वेन कारणत्वकल्पनमावश्यकमिति भावः। अत्रापि विशेषकार्यकारणभावस्यानावश्यकत्वं मन्यन्ते प्रकारान्तरवादिन इति ध्येयम्। जन्यभावत्वेन कारणत्वकल्पनस्यानावश्यकत्वं पुनराशङ्कते "**न चे**"त्यादिना। स्वप्रतियोगिजन्यत्वसम्बन्धेन द्रव्यनाशविशिष्टो यो द्रव्यसमवेतः, प्रतियोगित्वसम्बन्धेन तन्नाशं प्रतीत्यर्थः। तथाच जातेर्जन्यत्वाभावेन न कार्यतावच्छेदकाक्रान्तत्वमिति। समाधत्ते—"**स्वत्वस्यैक्याभावा**"दिति। स्वत्वस्याननुगतत्वेन तद्घटितकार्यकारणभावानां प्रत्येकव्यक्तिविश्रान्तेरनन्तत्वापत्तेरित्यर्थः। इदमुपलक्षणं नियमघटितजन्यत्वनिवेशेन कार्यतावच्छेदकगौरवमपि।

एतावता ग्रन्थेन प्रतियोगित्वसम्बन्धेन ध्वंसं प्रति तादात्म्येन जन्यभावस्य कारणताया आवश्यकत्वमुपपादितम्, इदानीं तादृशकार्यकारणभावे कारणतावच्छेदकभावत्वनिवेशसार्थक्यमुपपादयितुमुपन्यस्यति "**न च जन्यत्वावच्छिन्नरूपसामान्यकारणवला**"दित्यादि। ध्वंसस्यापि जन्यत्वादिति भावः। तद्दूषयति "**सामान्यसामग्री विशेषकारणमादाय फलजनिके**"ति। रूपादिनाशं प्रति रूपादित्वेन, घटादिनाशं प्रति

**क्षणिकान्त्यशब्दनाशे विशेषकारणं विनापि सामान्यकारणेन फलजननाद् विशेषसामग्र्यसमवहितायाः सामान्यसामग्र्या अपि फलजनकत्वकल्पनस्यावश्यकतया तद्बलाद् ध्वंसनाशापत्तिः स्यादिति वाच्यम्, तत्रापि स्वप्रति-**

घटादित्वेनेत्यादिरीत्या वस्तुनो ये ये नाशप्रतियोगिनस्तत्तन्नाशं प्रति तेषां प्रत्येकं तत्त्वेन कल्पितस्य विशेषकारणस्याभावादेव नाशं प्रति जन्यत्वेन कारणत्वमिति सामान्यसामग्र्या न कार्यजनकत्वम्, तथाच कथं ध्वंसस्य ध्वंसापत्तिः। एतद्दूषयितुं विशेषसामग्रीं विनापि सामान्यसामग्र्याः फलजनकत्वं दृष्टान्तमुखेन प्रदर्शयति—**"न च क्षणिकान्त्यशब्दनाश"** इत्यादिना। क्षणिकत्वं क्षणमात्रस्थायित्वम्, क्षणत्वञ्च स्ववृत्तिध्वंसप्रतियोग्यनधिकरणत्वम्। स्वतादात्म्य-स्ववृत्तिध्वंसप्रतियोग्यनधिकरणत्वोभयसम्बन्धेन समयविशिष्टत्वमिति यावत्। तथाहि कण्ठताल्वभिघातजनितशब्दानां प्रथमशब्दो द्वितीयशब्देन, द्वितीयशब्दस्तृतीयशब्देनेत्यादिरीत्या चरमशब्दाव्यवहितपूर्वकालोत्पन्नशब्दस्य नाशः। चरमशब्दानन्तरमुच्चारयितुः शब्दोत्पादाभावात्तस्य क्षणिकत्वम्। चरमशब्दनिमित्तकारणीभूतस्यादृष्टस्य नाशात्तन्नाशः, महाप्रलयपूर्वक्षणोत्पन्नसंक्षोभजनितध्वन्यात्मकक्षणिकशब्दस्यापि तादृशशब्दकारणीभूतादृष्टविशेषनाशादेव नाश[1] इति चरमशब्दस्य क्षणिकत्ववादिनां सिद्धान्तः।

केचित्तु चरमशब्दाव्यवहितपूर्ववर्तिशब्दस्यैवाव्यवहितोत्तरत्वसम्बन्धेन नाशकत्वं कल्पयन्तीति ध्येयम्। नन्वेवं योग्यविभुसमवेतविशेषगुणानामित्यादिनियमस्य का गतिः? तन्नियमोट्टङ्कितकार्यकारणभावश्च प्रतियोगित्वसम्बन्धेन विभुसमवेतयोग्यविशेषगुणनाशं प्रति स्वपूर्वत्व-स्वसामानाधिकरण्योभयसम्बन्धेन तादृशविशेषगुणस्य कारणत्वमिति चेन्न, तस्य स्वत्वघटितत्वेन प्रत्येकव्यक्तिविश्रान्ततया फलबलात् क्षणिकस्थले तादृशकार्यकारणभावाकल्पनात्।

एवञ्च यथा क्षणिकान्त्यशब्दस्य विशेषकारणासत्त्वेऽपि निमित्तकारणीभूतादृष्टविशेषनाशान्नाशः[2], यथा वा चरमसंयोगस्य नाशः संयोगनिमित्तकारणीभूतस्यादृष्टस्य नाशादेव

1 अत्र कार्यकारणभावश्च—स्वप्रतियोग्यनुकूलकृतिमत्त्वसम्बन्धेन शब्दनाशं प्रति स्वरूपेणादृष्टनाशस्य, प्रतियोगित्वसम्बन्धेन क्षणिकान्त्यशब्दनाशं प्रति स्वप्रतियोगिजन्यत्वसम्बन्धेनादृष्टनाशस्य वा कारणत्वम्। संयोगनाशं प्रत्यप्यनयैव दिशा कार्यकारणभावः कल्पनीयः।

2 निमित्तकारणीभूतस्यादृष्टस्य नाशादपि कार्यस्य नाशो गदाधरपादैरुपाधिवादेऽङ्गीकृतः।

**योगित्वसम्बन्धेन नाशरूपकार्यस्य विशेषकारणसत्त्वात्। क्षणिकत्वानङ्गीकाराच्च ति चेन्न, कर्मनाशः संयोगनाशो वा महाप्रलय इति दीधितिः। तन्मते**

---

स्वीक्रियते, तथा अत्रापि रूपादिध्वंसं प्रति रूपादित्वेन कारणत्वमित्यादिरीत्या कल्पितानां कल्पयितव्यानामन्येषाञ्च विशेषकारणानामसत्त्वेऽपि अदृष्टनाशरूपसामान्यकारणबलाद् ध्वंसस्य ध्वंसापत्ति[1]रिति। "**तद्बलाद् ध्वंसनाशापत्ति**"रित्यन्तग्रन्थभावार्थः। 'तद्बला'दृष्टादिनाशरूपसामान्यकारणबलादित्यर्थः। तद्दूषयति "**तत्रापी**"ति। क्षणिकान्त्यशब्दस्थलेऽपीत्यर्थः। स्वप्रतियोगित्वसम्बन्धेन नाशरूपकार्यस्य तादात्म्येन शब्दरूपविशेषकारणसत्त्वादिति। क्षणिकान्त्यशब्दस्यैव स्वध्वंसं प्रति विशेषकारणत्वमिति भावः। प्रतियोगित्वसम्बन्धेन नाशं प्रति तादात्म्येन प्रतियोगिनः कारणत्वमित्यपि सामान्यकार्यकारणभावएव। तत्तद्व्यक्तिध्वंसं प्रति तत्तद्व्यक्तेः कारणत्वमिति च विशेषकार्यकारणभाव इति यदि ब्रूयात्तदाप्याह—"**क्षणिकत्वानङ्गीकाराच्चेति**"। वस्तुतस्तु शब्दस्य क्षणिकत्वमेवासिद्धम्, किं सामान्यविशेषकारणचिन्तया? तथाहि ज्ञानादीनां क्षणिकत्ववारणाय स्वप्रतियोगित्वसम्बन्धेन नाशं प्रति स्वाव्यवहितपूर्वत्वसम्बन्धेन नाशस्य कारणत्वात्, ज्ञानोत्पत्तिपूर्वक्षणे नाशरूपकार्याधिकरणस्याभावादव्यवहितपूर्वत्वसम्बन्धेन कार्याधिकरणे यस्य कस्यचिन्नाशस्यावर्तमानतया यथा न ज्ञानादीनां क्षणिकत्वं तथा प्रतियोगित्वसम्बन्धेन नाशवतः क्षणिकशब्दस्य कार्याव्यवहितप्राक्क्षणे असत्त्वेन यस्य कस्यचिन्नाशस्यापि कार्यासमानाधिकरणतया न शब्दस्य क्षणिकत्वापत्तिरिति। न च तत्र नाशस्य कार्यकालवृत्तितयैव कारणत्वमिति वाच्यम्, कार्यकालवृत्तेरपि कारणस्य कार्याव्यवहितपूर्ववर्तित्वावश्यम्भावात्। अन्यथा तत्र कारणलक्षणमेव नाभिगच्छेदिति। नन्वेवं ज्ञाननाशाव्यवहितपूर्ववर्तिण्यामिच्छायामपि स्वाव्यवहितपूर्वत्वसम्बन्धेन ज्ञाननाशस्य सत्त्वात्तत्र प्रतियोगित्वसम्बन्धेन ज्ञाननाशापत्तिरिति चेन्न, तथाहि प्रतियोगित्वसम्बन्धेन ज्ञाननाशं प्रति यथा स्वाव्यवहितपूर्वत्वसम्बन्धेन नाशस्य कारणत्वं तथा ज्ञानत्वावच्छिन्नस्य तादात्म्येनापि क्लृप्तं कारणत्वम्, एवञ्च कार्यतानिरूपितकारणतावच्छेदकानि यावन्ति तत्प्रत्येकावच्छिन्नसम्वलनस्यैव कार्योत्पत्ताव-

---

1 प्रतियोगित्वसम्बन्धेन रूपनाशं प्रति रूपत्वेन, रसनाशं प्रति रसत्वेन तादात्मसम्बन्धेन कल्पितानि विशेषकारणानि कल्पनयोग्यान्यन्यानि वा यानि विशेषकारणानि तेषामभावेऽपि क्षणिकान्त्यशब्दस्थल इवात्रापि विशेषकारणासत्त्वेऽप्यदृष्टनाशरूपसामान्यकारणबलादेव ध्वंसनाशापत्तिरिति तत्रभवतां सुबोधिनीटीकाकृतामाशयः।

**परमाणुकर्मणां नाशः प्रलयः। प्रलये कर्मसत्त्वे जन्यभावानधिकरणत्वं प्रलयस्य व्याहन्येत, तदुत्तरसंयोगस्य सत्त्वात्। अतः संयोगनाश एव प्रलयः। तन्निमित्तकारणनाशादेव नाश इति मते अदृष्टनाशस्तत्र कारणम्।**

---

पेक्षणीयतया न तत्र च्छायां स्वाव्यवहितपूर्वत्वसम्बन्धेन ज्ञाननाशापत्तिरिति। असीमाकाशेषु कस्यचित् कण्ठताल्वभिघातोत्पन्नचरमशब्दस्यानन्तरमप्यनन्तव्यक्तीनां येन केनचिदुच्चरितेन शब्देन तादृशचरमशब्दस्य नाशोऽनायत्या कल्पनीयः। महाप्रलयानङ्गीकाराच्च न कुत्रापि काचिदनुपपत्तिरिति क्षणिकत्वानङ्गीकर्तॄणामाशय इति ध्येयम्। न च महाप्रलयाङ्गीकारपक्षे निरुक्तकार्यकारणभावस्य व्यभिचार इति न शङ्क्यम्, अननुगतस्वत्वघटितनिरुक्तकार्यकारणभावस्य सर्वोपसंहारेण कल्पयितुमशक्यत्वात् महाप्रलयस्थले तदकल्पनात्। निमित्तकारणनाशादेव तन्नाश इत्यनुपदमेव मूलकृतापि वक्ष्यत अतस्तन्नाशस्यापि नानुपपत्तिः।

एवञ्च जन्यभावत्वेन कारणत्वमित्यत्र भावत्वानिवेशे ध्वंसस्य ध्वंसापत्तिस्तदवस्थैव। ध्वंसस्य ध्वंसापत्तिं दृढीकर्तुं भूमिकामारचयति—"**ननु कर्मनाशः संयोगनाशो वा महाप्रलय**" इति। "कर्मनाशः संयोगाशो वे"ति। परमाणुसंयोगनाश इत्यर्थः। कर्मनाशः परमाणुकर्मणां नाशः। ननु परमाणुकर्मणां नाशेऽपि तादृशक्रियाजन्योत्तरसंयोगस्य सत्त्वान्महाप्रलयस्य जन्यभावानधिकरणत्वव्याहतिस्तदवस्थैवेत्याशङ्क्याह—"**संयोगनाशो वे**"ति। अत्र वाकारोप्यर्थे। कर्मनाशः संयोगनाशोऽपीत्यर्थः। ननु महाप्रलये कर्मासत्त्वे "दोधूयमानास्तिष्ठन्ति प्रलये परमाणव" इति प्राचीनाभानकस्य "महाभूतसंक्षोभप्रभववेगजनितकर्माणि संतन्यमानान्यवतिष्ठन्ते" इति किरणावल्यामाचार्यपादोक्तेश्च का गतिरिति-चेन्न, तयोः प्रलय[1]परत्वात्। प्रलये च विश्लिष्टानां परमाणूनां क्रियाः सन्त्येव, न ताः संयोगारम्भकाः, तज्जनितसंयोगानां स्वीकारेऽपि तादृशसंयोगा न द्रव्यारम्भप्रयोजकाः। तथात्वे तैः संयोगैर्द्व्यणुकाद्यैरुत्पत्त्या तादृशप्रलयस्य जन्यद्रव्यानधिकरणत्वं व्याहन्येतेत्यवधेयम्। वस्तुतस्तु प्रलये विश्लिष्टाः परमाणव एव वर्तन्ते न तु ताः संयोगजनिकाः, पुनः सर्गादौ महेश्वरस्य सिसृक्षया लब्धवृत्तिभ्योऽदृष्टेभ्यः अदृष्टवदात्मसंयोगात् परमाणुक्रियातस्तत्संयोगाद् द्व्यणुकादिक्रमेणावयविन उत्पद्यन्ते।

इदमत्र चिन्तनीयम्—सर्वेषां जन्यभावानां नाशस्यैव महाप्रलयत्वात्, तत्र भवद्भिर्दीधितिकृद्भिः केनाशयेन कुत्रेदमुक्तं तत् तत्रभवन्तो मूलकृत एव जानन्ति।

ननु संयोगनाश एव चेन्महाप्रलयः, स च किम्प्रयोज्य इत्याकाङ्क्षायामाह—"**तन्निमित्तकारणनाशादेव नाश**" इत्यादि। तस्य संयोगस्येत्यर्थः। तस्य निमित्त-

---

[1] अत्र प्रलयपदं खण्डप्रलयपरम्।

**तत्र च सामान्यतोऽदृष्टनाशत्वेन न हेतुता। तदानीमपि [इदानीमपि] यथाकथञ्चित्तन्नाशत्वेन प्रलयात्मकनाशापत्तेरपि तु [तत्तद्] अदृष्टनाशत्वेन। तस्य कार्यतावच्छेदकश्च न संयोगनाशत्वं व्यभिचाराद् अपि तु तत्तत् संयोगनाशत्वम्। इत्थञ्च तथाविधानन्तपरमाणुसंयोगानामेव तदानीं नाशात्तद्मेदेनाप्यनन्तकार्यकारणभावप्रसङ्गात्। एतददृष्टनाशविशिष्ट-**

---

कारणन्तु अदृष्टमेव। भट्टाचार्यपादैरप्यदृष्टनाशादेव चरमसंयोगनाश उपाधिवादेऽङ्गीकृतः।

सामान्यतोऽदृष्टनाशत्वेन कारणत्वे दोषमाह—"**इदानीमपी**"त्यादि "**प्रलयात्मकनाशापत्ते**"रित्यन्तेन। प्रतियोगित्वसम्बन्धेन संयोगत्वावच्छिन्नप्रतियोगिकनाशत्वावच्छिन्नं प्रति कालिकसम्बन्धेनादृष्टप्रतियोगिकनाशत्वावच्छिन्नस्य सामान्यतः कारणत्वे इदानीन्तनसंयोगप्रतियोगिकनाशानामपि कालिकेनादृष्टनाशवत्त्वात् प्रलयत्वापत्तिरिति भावः। सामान्यतोऽदृष्टप्रतियोगिकनाशत्वेन कारणत्वमप्रकल्प्य तत्तददृष्टप्रतियोगिकनाशत्वेन कारणत्वकल्पनया प्रलयापत्तिदोषवारणेऽपि संयोगनाशत्वस्य तत् कार्यतावच्छेदकत्वे दोषमाह—"**व्यभिचारा**"दिति। न हि यावतां संयोगानां जनकं किञ्चिददृष्टमस्ति येन तन्नाशः संयोगसामान्यनाशमापादयेत्, तथाच विभिन्नकालीने प्रतियोगित्वसम्बन्धेन नाशवति संयोगत्वावच्छिन्ने कालिकेन तत्तन्नाशासत्त्वाद्व्यतिरेकव्यभिचारः। कार्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपव्यतिरेकव्यभिचारग्रहश्च कार्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वघटितकारणत्वग्रहस्य प्रतिबन्धकत्वान्निरुक्तकार्यकारणभावग्रहस्यैवासम्भव इति भावः।

तत्तददृष्टनाशत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकत्वनिरूपणेन व्यभिचारमुद्धरति-"**तत्तत्संयोगनाशत्व**"मित्यादिना। तथाच तत्तत्संयोगनाशत्वावच्छिन्नं प्रति तत्तददृष्टनाशत्वेन कारणत्वमित्यर्थः। अत्र प्रतियोगित्व-कालिकौ कार्यकारणतावच्छेदकसम्बन्धाववसेयौ।

जन्यमात्रं प्रति अदृष्टस्य कारणत्वात् प्रलयान्तरसर्गादौ महेश्वरस्य सिसृक्षया संजाताभ्यः परमाणुक्रियाभ्यः समुत्पन्नाः परमाणुसंयोगा अप्यदृष्टाधीनाः। येषामुपभोगाय द्व्यणुकादि क्रमेणावयविन उत्पद्यन्ते तेषामदृष्टजन्या एव तत्तत्परमाणुसंयोगाः। तादृशादृष्टनाशादेव परमाणुसंयोगनाश इति भावः। अननुगततत्तद्घटितानां निरुक्तकार्यकारणभावानामानन्त्यमाह—"**इत्थञ्चे**"त्यादिना। इत्थञ्च तत्तत्संयोगनाशं प्रति तत्तददृष्टनाशत्वेन कारणत्व इत्यर्थः। "**तदानीं**" महाप्रलये। अनन्तपरमाणुसंयोगानां नाशात् "**अनन्तकार्यकारणभावप्रसङ्गात्**" अनन्तकार्यकारणभावकल्पनप्रसङ्गात्। तथाच महद्-

**नाशत्वावच्छिन्नं प्रति एतददृष्टनाशस्य हेतुत्वे ध्वंसनाशापत्तेः, ध्वंसस्यापि कालिकेन नाशवत्त्वात्।**

**न च तन्नाशकर्तृनाशत्व(?)मवच्छेदकमिति वाच्यं [तन्नाशवत् सन्नाशत्वम्]**

---

गौरवम्। कथञ्चिदनुगतकार्यकारणभावकल्पनेनानन्त्यदोषपरिहर्तुमाह "**एतददृष्टनाशविशिष्टनाशत्वावच्छिन्नं प्रती**"त्यादिना। कालिकेनादृष्टनाशविशिष्टो यः प्रतियोगित्वसम्बन्धेन तन्नाशत्वावच्छिन्नं प्रतीत्यर्थः। बहुतरसंयोगानामपि कालिकेनादृष्टवत्त्वात् कथञ्चित् कार्यतावच्छेदकलाघवमित्याशयः। तत्र दोषमाह "**ध्वंसनाशापत्तेः**"। तत्पादकमाह "**ध्वंसस्यापि कालिकेन नाशवत्त्वादि**"ति।

ध्वंसनाशापत्तिवारणाय कार्यतावच्छेदकं सङ्कोचयति "**तन्नाशकर्तृनाशत्वमवच्छेदक**"मित्यादि। अच्छेदकं कार्यतावच्छेदकं। कर्तृत्वञ्चात्र प्रतियोगित्वं नाशार्थकधातूत्तरकर्तृविहिताख्यातप्रत्ययस्य प्रतियोगित्वरूपकर्तृतार्थकत्वात्, घटो नश्यतीत्यादौ नाशप्रतियोगितावान् घट इत्याकारकशाब्दबोधात्। तथाच नाशप्रतियोगी यस्तत्प्रतियोगिकनाशत्वस्यैव कार्यतावच्छेदकत्वात्, ध्वंसस्य वस्तुतो ध्वंसाभावेन नाशाप्रयियोगित्वान्न कार्यतावच्छेदकाक्रान्तत्वमिति भावः। प्रतियोगित्वमत्र सामानाधिकरण्यसम्बन्धेन भावत्वेन विशेषणीयम्, तेन सन्निष्ठप्रतियोगित्वमिति लब्धम्। एतेन कार्यतावच्छेदकसत्त्वनिवेशापेक्षयेत्याद्यग्रिमग्रन्थेन न विरोधः, नो वा प्रतियोगित्वसम्बन्धेन नाशवति प्रागभावे कारणतावच्छेदकजन्यत्वस्यासत्त्वाद् व्यभिचार शङ्कापीति। एवञ्च ध्वंसनिष्ठप्रतियोगिताया अतादृशत्वात् न ध्वंसस्य ध्वंसापत्तिरिति ध्येयम्।

अत्रेदं विज्ञाप्यम्, आदर्शपुस्तकस्य ? चिह्नितप्रतिलिपीयपाठमनुसृत्य कष्टकल्पनया कृतव्याख्यानानन्तरं श्रीमता सम्पादकेनादर्शपुस्तकीयविशुद्धः "नाशवत्सन्नाशत्वमिति" पाठः प्रतिलिप्यां संयोजितः। मयापि पूर्वतनसंशोधितपाठस्य कथमपि तादृशतात्पर्येणैव व्याख्या कृतेति तदनुच्छिद्य संशोधितपाठस्य व्याख्यानमाख्यायते। "तन्नाशवत सन्नाशत्वमवच्छेदकमि"ति। तन्नाशवत अदृष्टनाशवत्, कालिकेन कालिकघटितसामानाधिकरण्यसम्बन्धेन वादृष्टनाशवान् यः सन् तत्प्रतियोगिकनाशत्वं कार्यतावच्छेदकम्। प्रतियोगित्वसम्बन्धेन नाशवत्सत्प्रतियोगिकनाशत्वावच्छिन्नं प्रतीति समुदितार्थः[1]। अदृष्टनाशासमान-

---

1 एवञ्च ध्वंसस्य सत्त्वाभावान्न कालिकसम्बन्धेन नाशवत्सत्प्रतियोगिकनाशत्वावच्छिन्नस्य प्रतियोगित्वसम्बन्धेन तत्रापत्तिरिति भावः।

**अनन्तादृष्टनाशकार्यतावच्छेदककोटौ सत्त्वनिवेशापेक्षया कारणतावच्छेदके भावत्वनिवेशोऽपि लघीयान् ।**

---

कालीने प्रतियोगित्वसम्बन्धेन संयोगनाशवति संयोगे कालिकेन कालिकघटितसामानाधिकरण्यसम्बन्धेन वा अदृष्टनाशासत्त्वात् व्यतिरेकव्यभिचारवारणाय कालिकेन कालिकघटितसामानाधिकरण्यसम्बन्धेन वाऽदृष्टनाशस्य सतो विशेषणत्वम् । एवञ्च ध्वंसस्य सत्त्वाभावान्न ध्वंसापत्तिरिति भावः । [1]वस्तुतस्तु स्वप्रतियोगिजन्यत्वकालिकोभयसम्बन्धेन तत्तदृष्टनाशविशिष्टो यः सन् प्रतियोगित्वसम्बन्धेन तत्तन्नाशत्वावच्छिन्नं प्रति कालिकेन तत्तदृष्टनाशत्वेन कारणत्वमवधेयम् ।

एतद्दूषयति "**अनन्तादृष्टनाशकार्यतावच्छेदककोटा**"वित्यादि "**कारणतावच्छेदके भावत्वनिवेशोऽपि लघीयान्**" इत्यन्तेन । अयमत्राशयः—निरुक्त कार्यतावच्छेदकनाशवत्सत्प्रतियोगिकनाशत्वस्यैक्येऽपि तत्तददृष्टभेदभिन्नानां तत्तददृष्टनाशत्वावच्छिन्नकारणत्वानामानन्त्येन तत्तत्कारणतानिरूपितनाशवत्सत्प्रतियोगिकनाशत्वावच्छिन्नकार्यताया अप्यानन्त्यमौचित्यावर्जितमेव । अन्यथा तादृशकार्यताया ऐक्ये यावतां तत्तददृष्टानामनाशे नाशवत्सत्प्रतियोगिकनाशत्वावच्छिन्नकार्यस्यानुत्पादापत्तेः । कार्यतानिरूपितकारणताश्रयीभूतानां यावतां कारणानां सद्भाव एव कार्योत्पादकत्वनियमात् । सामान्यतः प्रतियोगित्वसम्बन्धेन ध्वंसं प्रति तादात्म्येन भावत्वेन कारणत्वे न कारणताऽऽनन्त्यकृतकार्यताबाहुल्यनिबन्धनगौरवम् । भावत्वं यथा नाननुगतं तथा अग्रे दर्शयिष्यामः । ननु स्वप्रतियोगिजन्यत्व-कालिकोभयसम्बन्धेन यः अदृष्टत्वजात्यवच्छिन्नविशिष्टः

---

1 स्वप्रतियोगिजन्यत्व-कालिकोभयसम्बन्धेन तत्तददृष्टनाशविशिष्टो यः सन् प्रतियोगित्वसम्बन्धेन तन्नाशत्वावच्छिन्नं प्रति कालिकसम्बन्धेन तददृष्टनाशत्वेन, स्वप्रतियोगिजन्यत्व-कालिकोभयसम्बन्धेन तददृष्टनाशविशिष्टो यः सन् प्रतियोगित्वसम्बन्धेन तन्नाशत्वावच्छिन्नं प्रति कालिकेनतददृष्टनाशत्वेन कारणत्वमित्यादिरीत्या तत्तदेतदादिभेदभिन्नादृष्टनाशघटितकार्यकारणभावः प्रातिस्विकरूपेण कल्पनीयः । कार्यतावच्छेदककुक्षौ स्वप्रतियोगिजन्यत्वनिवेशेन ये ये सन्तो यद्यददृष्टाधीनाः प्रतियोगित्वसम्बन्धेन तत्तन्नाशत्वावच्छिन्नं प्रत्येव तत्तदृष्टनाशस्य कारणत्वं लब्धम् । अन्यथा तदनिवेशे तत्तददृष्टानधीनतत्तत्सतामपि तत्तत्सदजनकादृष्टनाशान्नाशापत्तेः । अत्रोभयसम्बन्धघटकतया कालिकस्य निवेशनं चिन्त्यम् ।

सन् प्रतियोगित्वसम्बन्धेन तन्नाशत्वावच्छिन्नं प्रत्यदृष्टत्वजात्यवच्छिन्नप्रतियोगिकनाशत्वेन कालिकसम्बन्धेन कारणत्वमिति रीत्या कार्यकारणभावः कल्पनीयस्तथाच तत्तददृष्टभेदेन न कार्यकारणभावानन्त्यम्। महाप्रलये चैकदैव समस्तादृष्टनाशाद् यावन्तः संयोगाः नश्यन्तीत्यतो न तत्र व्यभिचार शङ्काऽपीति चेन्न, अदृष्टत्वस्य जातित्वसाधकप्रमाणासद्भावात्। तथाहि अदृष्टस्याप्रत्यक्षत्वेन तद्गतधर्मस्यापि न प्रत्यक्षम्। नाप्यनुमानं प्रमाणम्, साधकहेत्वभावात्। यदुक्तमाचार्यपादैरपि किरणावल्यां "नत्वदृष्टत्वं नाम सामान्यमस्ति, कार्यकारणभावलक्षणानां तद्व्यवस्थापकानामभावा"दिति। समवाय्यसमवायिकारणतावच्छेदकत्वरूपहेतुर्हि जातित्वं साधयति, अदृष्टत्वन्तु न कस्यापि तादृशकारणतावच्छेदकम्। सुखासमवायिकारणतावच्छेदकतया धर्मत्वस्य दुःखासमवायिकारणतावच्छेदकतया चाधर्मत्वस्य जातित्वसिद्धिरिति।

न च माभूददृष्टत्वं जातिः, धर्माधर्मसाधारणानुगतोपाधिस्तु स्यादिति वाच्यम्, तादृशानुगतोपाधेरपि युक्तेः पराहतत्वात्। एवञ्चेद् जन्यमात्रं प्रति किं सामान्यं कारणं वक्तव्यम्? न किञ्चिदपि। कानिचिज्जन्यानि धर्मजन्यानि, कानिचिच्च जन्यान्यधर्मजन्यानि, जन्यगतधर्माधर्मनिरूपितजन्यतावच्छेदकवैजात्यस्वीकारादेव नानुपपत्तिः। तत्तज्जन्यं प्रति तत्तद्धर्मत्वेनातिविशेषकार्यकारणभावोऽपि कल्पनीय इति सुधीभिर्विवेचनीयम्।

ननु यद्विशेषे यद्विशेषस्य तत्सामान्ये तत्सामान्यस्येति न्यायात् - जन्यविशेषं प्रति धर्मत्वेन जन्यान्तरविशेषं प्रति चाधर्मत्वेन कारणत्वे जन्यत्वावच्छिन्नं प्रत्यदृष्टत्वेन कारणत्वमप्यवर्जनीयम्, तत एवादृष्टत्वस्यानुगतोपाधित्वसिद्धिरिति चेन्न, तथाहि तत्तत्कार्यसामान्याभावप्रजोजकस्य लाघवार्थमेव तादृशसामान्यकार्यकारणभावकल्पनस्यावश्यकत्वम्, यथा तत्तदनुमितिव्यक्तिं प्रति तत्तत्परामर्शव्यक्तेः कारणत्वे तत्पक्षकतत्साध्यकानुमितिसामान्याभावप्रयोजकत्वमेकस्मिन्नेव तत्तद्व्याप्तिपक्षधर्मताविशिष्टज्ञानत्वरूपपरामर्शत्वावच्छिन्नाभावे स्वीकारे लाघवम्। अन्यथा तत्तत्परामर्शव्यक्त्यभावकूटे प्रयोजकत्वाङ्गीकारे महद्गौरवं स्यात्, अत्र तु प्रलये जन्यसामान्याभावविरोधिनः परमाणुक्रियादृष्टादिजन्यस्य, महाप्रलयात्मककालेऽपि ध्वंसरूपजन्यस्य च सत्त्वात्, जन्यसामान्याभावस्यैवासिद्धिः, यदनुरोधेन जन्यसामान्यं प्रति अनुगतादृष्टत्वरूपोपाधिना कार्यकारणभावं कल्पयेत्।

न च परमात्मन्येव जन्यसामान्याभावप्रसिद्धिरिति वाच्यम्, तत्र सर्वमूर्तसंयोगानुयोगित्वरूपसर्वगतत्वसत्त्वेन मूर्तसंयोगानाञ्च जन्यतया जन्यसामान्याभावस्य परमात्मन्यप्यसिद्धेः।

**न च तद्दृष्टनाशकालीनानन्तादृष्टनाशोत्पादात् कार्यतावच्छेदककोटौ तन्नाशवैशिष्ट्यनिवेशापेक्षया तद्दृष्टनाशविशिष्टव्यक्तेस्तत्त्वेन कार्यतास्वीकारे ध्वंसनाशापादनासम्भवः।**

---

न च जातौ जन्यसामान्याभावप्रसिद्धिरिति वाच्यम्, जातावपि जातिद्वयत्रयगतद्वित्वत्रित्वादिसंख्यारूपजन्यस्य सत्त्वात्।

किञ्च यथा त्रिविधसंस्कारसाधारणानुगतसंस्कारत्वरूपोपाधिना संस्कारगतमेकत्वं गुणानां चतुर्विंशतिसंख्यापूरकं तथा अदृष्टत्वस्यानुगतोपाधित्वे सूत्रकृदुक्तचशब्दसमुच्चितगुणभावापन्नसप्तान्तर्गतादृष्टगतधर्माधर्मसाधारणादृष्टत्वरूपोपाधिनापि औचित्यावर्जिते अदृष्टगतैकत्वलाभे भाष्यकाराणां गुणानां चतुर्विंशतिसंख्यापूरणं कथं स्यात्? अतस्तत्रादृष्टपदशक्यतावच्छेदकधर्मत्वाधर्मत्वाभ्यां प्रत्येकमवच्छिन्नौ धर्माधर्मौ संगृह्य गुणानां चतुर्विंशतिसंख्याः प्रपूरिता भाष्यकृद्भिरिति मन्यामहे।

शक्यता च [1]तत्र पुष्पवन्तपदशक्यतावदेकशक्तिनिरूपिता, अतो नानुपपत्तिः। एतेन शक्यतावच्छेदकतयाप्यनुगतादृष्टत्वरूपोपाधिसिद्धिरिति परास्तम्। एवञ्चादृष्टस्य गुणत्वव्याप्यजातिमत्त्वाभावात् अनुगतोपाधिमत्त्वाभावाच्च जन्यसामान्यं प्रत्यदृष्टसामान्यस्य न कारणत्वसिद्धिरिति ध्येयम्।

प्रतियोगित्वसम्बन्धेन ध्वंसत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदककुक्षौ जन्यत्वमात्रस्य निवेशः सम्भवति न वेति विचारावसरे एतद्दृष्टनाशविशिष्टनाशत्वावच्छिन्नं प्रत्येतद्दृष्टनाशस्य कारणत्वकल्पने ध्वंसस्याप्यापाद्यमाननाशवारणार्थं कार्यतावच्छेदककोटौ सत्प्रतियोगिकनाशत्वं निवेशितम्। इदानीं कार्यतावच्छेदककोटौ तन्नाशवैशिष्ट्यं सत्प्रतियोगिकनाशत्वञ्चानिवेश्य प्रकारान्तरेण ध्वंसनाशापत्तिं वारयितुमुपन्यस्यति "**न च तद्दृष्टनाशकालीनानन्तादृष्टनाशोत्पादा**"दित्यादि। तद्दृष्टविशिष्टव्यक्तेरित्यत्र वैशिष्ट्यञ्च स्वप्रयोज्यत्व-स्वप्रतियोगिकनाश[2]सामानाधिकरण्योभयसम्बन्धेन। एवञ्च बहुतरसंयोगानामपि एकादृष्टप्रयोज्यत्वात् कथञ्चिदनुगतत्वम्। ध्वंसस्य प्रयोज्यत्वाभावाच्च न कार्यतावच्छेदकाक्रान्तत्वमिति केचित्। तन्न मनोरमम्, जन्यमात्रस्यैव धर्माधर्मरूपादृष्टप्रयोज्यतया ध्वंसस्याप्यदृष्टप्रयोज्यत्वात्। वस्तुतो "**व्यक्तेस्तत्त्वेन कार्यतास्वीकारे**" इति

---

1 तत्र धर्माधर्मयोरित्यर्थः। धर्मत्वावच्छिन्नाधर्मत्वावच्छिन्नोभयस्यैवादृष्टपदनिष्ठैकशक्तिनिरूपितैकशक्यतावत्त्वमिति यावत्। 2 सामानाधिकरण्यञ्च कालिकसम्बन्धघटितम्।

**एवं प्रतियोगिनां तत्तत्संयोगानामपि परस्मिन् परस्परनाशवारणाय प्रतियोगिनां विशिष्य हेतुत्वात् तत एवासम्भव इति वाच्यम्, तद्व्यक्तित्वेन कार्यतास्वीकारे कार्यतावच्छेदकभेदेन कार्यताया आनन्त्यतादवस्थ्यात्, जन्यत्वस्य प्रागभावप्रतियोगित्वादिरूपतया नानात्वात्, तदपेक्षया**

---

मूलोक्तया "तत्त्वेन" तद्व्यक्तित्वेनेत्यर्थस्यैव सहजत उपलभ्यमानत्वात्, अदृष्टविशिष्टत्वस्य कार्यतानवच्छेदकत्वात्[1]। एवञ्चादृष्टव्यक्तेस्तत्तद्व्यक्तित्वेन कार्यतास्वीकारे ये ये वस्तुगत्या नाशप्रतियोगिनः तानेव [2]तत्तद्व्यक्तित्वेन प्रातिस्विकरूपेणान्तर्भाव्य कार्यतायाः कल्पनात् ध्वंसस्य ध्वंसप्रतियोगित्वाभावेन तद्व्यक्तित्वेन ध्वंसमन्तर्भाव्य तादृशकार्यकारणभावकल्पनस्यानावश्यकत्वान्न ध्वंसस्य ध्वंसापत्तिरिति भावः। तत्तद्व्यक्तित्वेन कार्यतास्वीकारे तत्संयोगव्यक्तेर्नाशस्य प्रतियोगित्वसम्बन्धेनापरसंयोगे उत्पादापत्तिः, समनियताभावानामैक्यात्, इति शङ्कासमाधानार्थमाह—"**एवं प्रतियोगिनां तत्तत्संयोगाना**"मित्यादि। "**प्रतियोगिनां विशिष्य हेतुत्वात् तत एवासम्भव**" इति। अयमत्राशयः—प्रतियोगिव्यक्तिभेदेन प्रतियोगिताया भिन्नत्वेन विलक्षणत्वेन च समनियतनाशानामैक्येऽपि तादृशविलक्षणप्रतियोगित्वसम्बन्धेन तत्संयोगनाशस्य तत्संयोग एव वर्तमानत्वात्। तत्संयोगव्यक्तिरूपहेतोश्च तादात्म्येन तत्र वर्तमानत्वात्। "असम्भवः" न सम्भवः। तत्संयोगध्वंसस्य न संयोगान्तरे उत्पादसम्भव इत्यर्थः। कल्पमेतं दूषयति-"**तद्व्यक्तित्वेन कार्यतास्वीकारे**" इत्यादिना। अत्रेदमवधातव्यम्—एतत्कल्पदूषकतया यो मूलपाठः उपन्यस्तः "**जन्यत्वस्य प्रागभावप्रतियोगित्वादिरूपतया नानात्वा**"दित्यादि। तादृशपाठेन ग्रन्थोत्थापकशङ्काया असमाधास्यमानत्वात् तादृशमूलपाठो न समोचीनः। तददृष्टविशिष्टव्यक्तिनिष्ठकार्यतानिरूपितकारणतावच्छेदककुक्षौ जन्यताया अप्रवेशात्। अतः कल्पस्यास्य दूषकतया "**तद्व्यक्तित्वेने**"त्यादि पाठो मया संयोजितः।

ननु तथापि भावत्वनिवेशो विफल इति पूर्वकृतशङ्कायाः समाधानमाह "**जन्यत्वस्य प्रागभावप्रतियोगित्वादिरूपतया नानात्वा**"दिति। तथा च ध्वंसं प्रति जन्यत्वेन

---

1 तद्व्यक्तित्वस्यैव कार्यतावच्छेदकत्वात्।

2 तद्व्यक्तित्वञ्च तादात्म्येन सैव व्यक्तिरिति पक्षतायां मथुरानाथः। स्वप्रतियोगिवृत्तित्व-स्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यत्वं वा।

**सत्त्वस्यैव कारणतावच्छेकं प्रतियोगिनां विशिष्य हेतुत्वादेव गगनादीनां नाशकारणसम्भवात् तत्र च न देयमेव जन्यतावत्त्वम् ।**

---

कारणत्वस्वीकारे कार्यकारणभावस्याननुगतत्वमिति भावः । जन्यत्वस्य[1] यथाननुगतत्वं यथास्थानमसकृदेव तत् प्रपञ्चितम् । ग्रन्थविस्तृतिभयेनात्र नोल्लिखितमिति ।

जन्यत्वनानात्वस्यापादकमाह **"जन्यत्वस्य प्रागभावप्रतियोगित्वादिरूपतये"**त्यादि । प्रतियोगितायाः प्रतियोगिभेदभिन्नत्वादिति भावः । न च प्रतियोगितात्वरूपेणानुगतैव प्रतियोगिता । तथाच जन्यत्वस्य नाननुगतत्वमिति वाच्यम्, प्रतियोगितासाधारणानुगमकप्रतियोगितात्वस्वीकारे प्रतियोगितात्वरूपेण प्रतियोगिताया ऐक्यात् घटाभावीयप्रतियोगिताया अपि प्रतियोगितात्वरूपेण पटनिष्ठत्वापत्तेः, एवं पटनिष्ठप्रतियोगिताया अपि ताद्रूप्येण घटनिष्ठत्वापत्तेः ।[2] प्रतियोगित्वादीत्यादिपदेन स्वसामानाधिकरण्य-स्वाव्यवहितोत्तरत्व-स्वनिष्ठानन्यथासिद्धत्वनिरूपितत्वैतत्त्रितयसम्बन्धेन किञ्चिद्विशिष्टत्वरूपजन्यत्वस्य तत्तदन्यथासिद्धिनिरूपकत्वाभावकूटवत्त्वे सति नियतपूर्ववर्तिताकत्वरूपजन्यत्वस्य च संग्रहः । स्वनिष्ठानन्यथासिद्धत्वस्य स्वनिष्ठतत्तदन्यथासिद्धिमद्भेदकूटत्वस्य नियतपूर्ववर्तिताकत्वस्य चाननुगतत्वेन तादृशयोर्जन्यत्वयोरप्यननुगतत्वमवधेयम् ।

वस्तुतस्तु जन्यत्वमात्रेण ध्वंसनिरूपितकारणतास्वीकारे ध्वंसस्य ध्वंसापत्तिरशक्यपरिहारैव । तथाच एतद् ग्रन्थारम्भोऽपि वैफल्यमेष्यति । एतेन कालिकेन सत्तावत्त्वरूपमनुगतमेव जन्यत्वमत्र निवेश्यमित्याक्षेपोऽपि निरस्तः ।

---

1 जन्यत्वं यदि प्रागभावप्रतियोगित्वं तदा प्रतियोगितायाः प्रतियोगिभेदभिन्नत्वेन कारणतावच्छेदकभेदात् कार्यकारणभावानन्त्यप्रसङ्गः, प्रागभावस्य ध्वंसघटिततया ध्वंसत्वस्य च जन्यताघटितत्वेन महागौरवञ्च । यदि च तत्तदन्यथा सिद्ध्यनिरूपकत्वे सति नियतपूर्ववर्तिताकत्वरूपं जन्यत्वम्, तदा नियतपूर्ववर्तित्वस्याननुगततया कार्यत्वस्याप्यननुगतत्वतादवस्थ्यम् । यदि कार्यत्वं स्वरूपसम्बन्धस्वरूपं तदापि कार्यभेदेन कार्यताभेदस्तदवस्थैवेति ।

2 इष्टापत्तौ च पटो घटाभावप्रतियोगी घटश्च पटाभावप्रतियोगीत्यादिव्यवहारापत्तिः । संसर्गमुद्रया प्रतिभातप्रतियोगिताया अपि तादृशानुगतधर्मरूपेण संसर्गत्वे तादृशप्रतियोगितासंसर्गेण घटाभावस्य पटादौ पटाभावस्य च घटादावप्यापत्तिस्तदवस्थैव तुल्ययुक्तेरिति ।

**न च तदाऽपेक्षाबुद्धिनाशस्थले स्वप्रतियोगिव्यापकत्वसम्बन्धेन नाशस्य हेतुत्वकल्पनात्तत्कारणबलादीश्वरीयापेक्षाबुद्धिनाशापत्तिरिति वाच्यम्,**

---

पूर्वं ध्वंसनिरुपितकारणतावच्छेदककुक्षौ भावत्वनिवेशस्य निष्फलत्वमाशङ्क्य जन्यत्वस्य प्रागभावप्रतियोगित्वादिरुपतया नानात्वादित्यनेन समाहितम्। इदानीं जन्यत्वनिवेशस्य विफलत्वमाशङ्कते "**तदपेक्षया सत्त्वस्यैव कारणातावच्छेदकमि**"त्यादिना। 'तदपेक्षया' अननुगतजन्यत्वनिवेशापेक्षया। 'सत्त्वस्यैव कारणतावच्छेदक'मिति, सत्त्वञ्च भावत्वम्, भावत्वञ्च द्रव्यादिषट्कान्यतमत्वम्, तादृशान्यतमत्वञ्च तत्तद्भेदकूटावच्छिन्नप्रतियोगिताकभेदवत्त्वम्, समवायेन सत्तावत्त्वं वा। तथाच नाननुगतत्वशङ्का। सत्त्वेन कारणत्वे सद्भूतानामाकाशादिनित्यानां नाशमाशङ्क्य निराकरोति "**प्रतियोगिनां विशिष्य हेतुत्वादेवे**"त्यादि।

अयमत्राभिप्रायः—ध्वंसत्वावच्छिन्नं प्रति सत्त्वेन सामान्यकार्यकारणभावस्वीकारेऽपि यत्र यत्र सामान्यकार्यकारणभावस्तत्र विशेषकार्यकारणभावस्याप्यवश्यकल्पनीयतया तस्य अननुगतत्वेन प्रत्येकव्यक्तिविश्रान्तत्वादाकाशादिनित्यवस्तुन्यन्तर्भाव्य विशेषसामग्रीकल्पनस्यानावश्यकत्वेन विशेषसामग्रीसमवहिताया एव सामान्यसामग्र्या कार्यजनकत्वनियमात्। नित्यस्थले तादृशविशेषसामग्र्यभावादेव न गगनादीनां नाशापत्तिः। उपसंहरति "**तत्र च न देयमेव जन्यतावत्त्व**"मिति। 'तत्र' प्रतियोगित्वसम्बन्धावच्छिन्नध्वंसत्वावच्छिन्नकार्यतानिरुपितकारणतायाम्। 'न देयमेव' अवच्छेदकतया जन्यत्वं न प्रवेश्यमेव।

नन्वेवं गगनस्य नाशवारणेऽपि भावतादात्म्यवति गगने प्रतियोगित्वसम्बन्धेन नाशासत्त्वात् अन्वयव्यभिचारः कथं वारणीय इति चेन्न, अन्वयव्यभिचारग्रहस्य ग्राह्यमुद्रया कारणताग्रहाप्रतिबन्धकत्वेन अन्यथासिद्धिमुद्रया अन्वयव्यभिचारग्रहस्य कारणताविघटकत्वानङ्गीकर्तृमते चेदमिति ध्येयम्।

यद्यपि प्रसङ्गाधीनसमुत्थितापेक्षाबुद्धिघटितविचारः पूर्वमेव समाहितस्तेन सहास्य साकाङ्क्षत्वाभावात्तन्मूलं नैतस्योत्थानबीजं तथापि नाशकारणताप्रस्तावादपेक्षाबुद्धिनाशस्थलेऽपि नाश्यनाशकभावं निरूप्येश्वरीयापेक्षाबुद्धेरपि नाशमाशङ्कते "**न च तदाऽपेक्षाबुद्धिनाशस्थले स्वप्रतियोगिव्यापकत्वसम्बन्धेन नाशस्य हेतुत्वकल्पना**"दित्यादिना। अत्र 'अपेक्षाबुद्धिनाशस्थल' इत्युपक्रमात् 'ईश्वरीयापेक्षाबुद्धिनाशापत्ति' रित्युपसंहृतपाठस्यैव संलग्नतया 'ईश्वरीयज्ञाननाशापत्ति' रिति मूलपाठः परित्यक्तः।

अत्र तदेति मसीसम्पातायातस्तदर्थो न विवक्षितः पूर्वमाकाङ्क्षोत्थापकयत्पदाभावात्। अथवा "यदि सर्वत्र नाशं प्रति नाशस्य कारणत्वमित्यध्याहृतपाठानन्तरं "तदेति" मूलं योजनीयम्। 'तदेति' तर्हीत्यर्थकम्। एवञ्च तर्हि अपेक्षाबुद्धिनाशं प्रत्यपि नाशस्य कारणत्वकल्पनाया औचित्यादाह 'न च तदे'त्यादि।

प्रतियोगित्वसम्बन्धेन अपेक्षाबुद्धिनाशं प्रति स्वप्रतियोगिव्यापकत्वसम्बन्धेन नाशस्य हेतुत्वादित्यर्थः। अत्र कारणीभूतनाशश्च स्वात्मवृत्तिविशेषगुणनाश एव, ईश्वरीयविशेषगुणस्य नाशाभावात्। स्वप्रतियोगिनो ये जन्यज्ञानादयस्तद्व्यापकत्वमित्यर्थः। तद्व्यापकत्वञ्चात्र तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वम्, व्यापकतावच्छेदकसम्बन्धश्चात्र विषयत्वम्, [1]सर्वविषयिण्यां नित्यायाञ्चेश्वरीयापेक्षाबुद्धौ विषयत्वसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्ध्या विषयत्वसम्बन्धावच्छिन्नप्रतियोगिताको यत्किञ्चिज्ज्ञानादेरभाव एव व्यापकताघटकः। एवञ्चेश्वरीयापेक्षाबुद्धेरपि स्वप्रतियोगिमन्निष्ठात्यन्ताभावाप्रतियोगित्वरूपव्यापकत्वात्, यत् यन्निरूपितत्वविशिष्टयत्सम्बन्धाधिकरणत्ववत् तत् तत्सम्बन्धेन तद्वदिति नियमेन स्वप्रतियोगिव्यापकत्वसम्बन्धेन नाशरूपकारणस्य ईश्वरीयापेक्षाबुद्धौ साधिततया तत्र प्रतियोगित्वसम्बन्धेन नाशापत्तिरिति समुदितार्थः।

न च विषयत्वस्य वृत्त्यनियामकतया प्रतियोगितायां तत्सम्बन्धावच्छिन्नत्वास्वीकारात् कथं विषयत्वस्य व्यापकतावच्छेदकसंसर्गत्वं तदभावाच्च नेश्वरीयापेक्षाबुद्धौ नाशप्रतियोगिव्यापकत्वसिद्धिरिति वाच्यम्, भट्टाचार्यचरणैर्व्युत्पत्तिवादे वृत्त्यनियामकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्वीकारे का क्षतिरित्युक्तया प्रतियोगिताया वृत्त्यनियामकसम्बन्धावच्छिन्नत्वस्यानुमोदितत्वात्। अत एव तैर्विभक्त्यर्थस्य संसर्गतया भानवादिनां मतमुल्लिख्य स्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभावविषयकशाब्दबोधः प्रकारान्तरेण दूषितः, न तु प्रतियोगितायां वृत्त्यनियामकसम्बन्धावच्छिन्नत्वमनङ्गीकृत्य।

वस्तुतस्तु घटे ज्ञानमिति प्रतीत्या विषयत्वसम्बन्धस्य वृत्त्यनियामकत्वं सामान्यलक्षणायां भट्टाचार्यपादेनाप्यङ्गीकृतम्। तत्र हि विषयत्वसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावत्त्वं ज्ञाने भासते। ज्ञानसमानकालीनविषये तु तादृशज्ञानस्य विषयत्वसम्बन्धेन वृत्तित्वस्वीकारे वादिनामप्यविवाद इति अस्माभिर्मन्यते।

---

1 यत् (व्याप्य) समानाधिकरणात्यन्ताभावीयप्रतियोगिता यत् सम्बन्धावच्छिन्ना तादृशसम्बन्ध एव व्यापकतावच्छेदकः। अथवा तत्समानाधिकरणभेदप्रतियोगितावच्छेदकत्वं यत्सम्बन्धेनावच्छिन्नं स एव व्यापकतावच्छेदकसम्बन्धः।

नन्वीश्वरीयापेक्षाबुद्धौ किं प्रमाणमिति चेन्न, सर्गादौ महेश्वरस्य सिसृक्षया अदृष्टवदात्मसंयोगात् परमाणुषु क्रिया उत्पद्यन्ते, ताभ्यश्च परमाणुद्वयसंयोगः, तस्माच्च द्व्यणुकादिक्रमेणावयविन उत्पद्यन्ते।

तत्र द्व्यणुकपरिमाणं प्रति परमाणुगतद्वित्वसंख्याया एव कारणत्वात् द्वित्वसंख्यायाश्चापेक्षाबुद्धिजन्यत्वात् तदानीमस्मदादिजीवानामसम्भवात् परमेश्वरीयापेक्षाबुद्धेरेव द्व्यणुकगतपरिमाणजनकतयाङ्गीकर्तव्यत्वात्। तथाचोक्तमाकरे 'द्वित्वसंख्या चाण्वोर्वर्तमाना अणुत्वमारभते' इति। अणुत्वमणुपरिमाणम्, द्व्यणुकपरिमाणमिति यावत्। न च तत्र द्व्यणुकपरिमाणं प्रति परमाणुपरिमाणस्यैव कारणत्वमस्तु, किन्तादृशद्वित्वसंख्याजनकतयेश्वरीयापेक्षाबुद्धिस्वीकारेणेति वाच्यम्, 'कारणत्वमन्यत्र[1] पारिमाण्डल्यादिभ्य' इत्याकरग्रन्थेन तट्टीकाकृद्भिराचार्यपादैरपि परमाणुपरिमाणस्य परिमाणजनकताया निषिद्धत्वात्। 'द्व्यणुकपरिमाणं न परमाणुपरिमाणजन्यमणुपरिमाणत्वात्' इत्यनुमित्या द्व्यणुकपरिमाणस्य परमाणुपरिमाणजन्यत्वग्रहप्रतिबन्धाच्च। नचात्र दृष्टान्तवैकल्यं यन्नैवं तन्नैवं यथा घटपरिमाणम्, इति व्यतिरेकि दृष्टान्तसम्भवात्। न चेदमप्रयोजकं परिमाणस्य सजातीयोत्कृष्टपरिमाणजनकत्वनियमात्, द्व्यणुकपरिमाणं यदि परमाणुपरिमाणजन्यं स्यात्तदा परमाणुपरिमाणादुत्कृष्ट'[2] स्यादिति तर्कस्यैव प्रयोजकत्वात्।

यद्वा परमाणुपरिमाणं न परिमाणजनकं नित्यपरिमाणत्वात् परममहत्परिमाणवदित्यनुमानेनापि परमाणुगतपरिमाणस्य द्व्यणुकगतपरमाणुजनकत्वं निषिध्यते।

न चेदमप्यप्रयोजकम्, परमाणुपरिमाणं यदि द्व्यणुकपरिमाणजनकं स्यात्तदा स्वसजातीयोत्कृष्टतरपरिमाणारम्भकं स्यादिति तर्कस्यैव प्रयोजकत्वात्। ननु क्वचित्प्रसिद्धस्यैवान्यत्रारोपस्य तर्करूपत्वात् परमाणुपरिमाणादुत्कृष्टतरपरिमाणाप्रसिद्ध्याऽलीकस्य कथं जनकत्वापत्तिरिति चेदत्र नव्याः—परमाणुपरिमाणं यदि परिमाणजनकं स्यात् स्वावधिकोत्कृष्टत्वस्वजन्यत्वोभयसम्बन्धावच्छिन्नाधेयत्वसम्बन्धेन परिमाणवत् स्यादित्यस्यैव तदर्थकत्वात्, त्र्यणुकपरिमाणजन्यस्य चतुरणुकस्य त्र्यणुकपरिमाणादुत्कृष्टस्य प्रसिद्धत्वात् निरुक्तसम्बन्धेन परमाणुपरिमाणे तादृशपरिमाणवत्ताया एवापत्तेस्तात्पर्यात्।

प्रशस्तपादाचार्यैरपि 'कारणत्वमन्यत्र पारिमाण्डल्यादिभ्य' इत्याकरग्रन्थेन तट्टीकाकृद्भिराचार्यपादैः किरणावल्या च परमाणुपरिमाणस्याकारणत्वस्य सयुक्तिकमुपपादितत्वा-

---

1　अन्यत्र पारिमाण्डल्यादिभ्यः परमाणुपरिमाणेभ्यो भिन्नेष्वित्यर्थः।

2　उत्कृष्टमत्र अणुत्वे परमाणुपरिमाणादपि सूक्ष्मतरमित्यर्थः।

दित्यपि पूर्वमुक्तत्वाच्च। दीधितिकारेण तु परमाणुपरिमाणस्य कारणत्वे असमवेतभावकार्योत्पत्तिरूपानिष्टप्रसङ्ग इत्यात्मतत्त्वविवेकटीकायामभिहितमिति ; तथा च अणुपरिमाणस्याणुपरिमाणजन्यत्वजनकत्वयोः प्रतिषेधे नव्यप्राचीनयोरविवाद इति संक्षेपः।

न च परमाणुगतद्वित्वसंख्याया ईश्वरीयापेक्षाबुद्धिजन्यत्वे अपेक्षाबुद्धिनाशस्य च द्वित्वादिसंख्यानाशकत्वनियमात्, ईश्वरीयापेक्षाबुद्धेर्नाशासम्भवेन परमाणुगतद्वित्वसंख्याया अविनाशित्वापत्तिरिति वाच्यम्, जन्यभावत्वस्य ध्वंसप्रतियोगित्वव्याप्यत्वनियमात् ईश्वरीयापेक्षाबुद्धिजन्यस्यापि तादृशद्वित्वस्याविनाशित्वानुपपत्तेः। नन्वेवं तादृशद्वित्वस्य जन्यत्वसिद्धौ तन्नाशस्य किमन्यत् कारणं वक्तव्यमीश्वरीयापेक्षाबुद्धेश्च नाशाभावादिति चेन्न अपेक्षाबुद्धेस्तत्तद्व्यक्तित्वेन कारणतया तन्नाशस्यापि तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकतत्तन्नाशत्वेनैव कारणत्वात् तस्याश्च प्रत्येकव्यक्तिविश्रान्तत्वेन सर्वसाधारण्याभावादनायत्याऽत्र ईश्वरीयापेक्षाबुद्धिजन्यद्वित्वजनकादृष्टनाशस्यैव तन्नाशकत्वकल्पनादिति ध्येयम्।

ननु परमाणुगतद्वित्वसंख्याया नित्यत्वमेवास्तु तस्यास्तथात्वेऽपि जातित्वप्रसक्तिर्न शङ्कनीया, तद्द्वित्वाधिकरणकपरमाणुतद्द्वित्वानधिकरणापरपरमाणुद्वयैतत्त्रितयगतत्रित्वेन साङ्कर्यात्[1] द्वित्वत्वजातेराश्रयस्य द्वित्वस्यापि जातित्वे अनवस्थाप्रसङ्गाच्चेति चेन्न, तादृशद्वित्वसंख्याया नित्यत्वे अपेक्षाबुद्धिजन्यतावच्छेदकतया द्वित्वत्वजातेरसिद्धेः। न ह्यतिप्रसक्तमवच्छेदकमिति नियमात्, अपेक्षाबुद्धिजन्यत्वाभाववति नित्यद्वित्वे द्वित्वत्वस्य वृत्तेः। न च सामानाधिकरण्यसम्बन्धेन जन्यत्वविशिष्टद्वित्वत्वमेवापेक्षाबुद्धिजन्यतावच्छेदकमस्त्विति वाच्यम्, सर्वविषयिण्या ईश्वरीयबुद्धेस्तत्तत्परमाणुगततत्तदेकत्वविषयकत्वेनापेक्षाबुद्ध्यात्मकत्वात्। लाघवतो द्वित्वसामान्यस्यैवापेक्षाबुद्धिजन्यत्वकल्पनात् परमाणुगतद्वित्वस्य नित्यत्वे प्रमाणाभावाच्च। परमाणुगतद्वित्वस्यापि तज्जन्यत्वसिद्धावपेक्षाबुद्धिजन्यतावच्छेदककुक्षौ जन्यत्वप्रवेशकृतगौरवस्वीकारस्यानावश्यकत्वमित्यलमनल्पजल्पनेनेति।

---

१ तथा च परमाणुगतद्वित्वं न जातिः त्रित्वसाङ्कर्यादित्यनुमानेन परमाणुगतद्वित्वे जातित्वाभावः साधनीयः। साङ्कर्यञ्च—स्वसामानाधिकरण्य-स्वाभावसामानाधिकरण्य-स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वैतत्त्रितयसम्बन्धेन धर्मविशिष्टत्वम्। निष्कर्षस्तु—अनुमितिगादाधर्यादौ प्रतिपादितः। साङ्कर्यस्य जातिबाधकत्वे युक्तिस्तु—स्वसामानाधिकरण्य-स्वाभावसामानाधिकरण्योभयसम्बन्धेन जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणाभावप्रतियोगित्वाभाव इति नियमभङ्गप्रसक्तिरिति।

**अपेक्षाबुद्धिनाशे कालिकसम्बन्धघटितस्वप्रतियोगिव्यापकत्वादेर्नाशकतावच्छेदक-सम्बन्धस्य नित्येऽसत्त्वान्नित्यस्य नाशासम्भवात् ।**

**न च कालिकसम्बन्धेन सत्तावत्त्वरूपजन्यत्वमेव निवेश्यताम्, तथा च ध्वंसस्यापि नाशोऽस्तु, पूर्वकल्पेऽपि विनिगमनाविरहादिति वाच्यम्, अनन्ताप्रामाणिकध्वंसस्य तत्कारणधारायाश्चाकल्पनस्यैव विनिगमकत्वात् । इदमेव दीधितिकारेणोक्तम् "अनन्तध्वंसतत्कारणधाराकल्पनातो ध्वंसानन्तत्व-कल्पनाया एवोचितत्वा"दिति ।**

---

ईश्वरीयापेक्षाबुद्धिनाशापत्तिनिरासायाह **"अपेक्षाबुद्धिनाशे कालिकसम्बन्ध-घटिते"**त्यादि । तथा च स्वप्रतियोगिनि स्वात्मनि कालिकसम्बन्धावच्छिन्नप्रतियोगिता-कस्येश्वरीयापेक्षाबुद्धेरभावस्य सत्त्वात् ईश्वरीयापेक्षाबुद्धेर्न नाशप्रतियोगिव्यापकत्वमिति । तत्समानाधिकरणाभावाप्रतियोगित्वस्यैव व्यापकत्वात् ।

अननुगततया गौरवभिया ध्वंसं प्रति जन्यत्वेन कारणत्वकल्पनमुपेक्ष्य भावत्वेनैव कारणत्वं निर्वाचितम् । इदानीं जन्यत्वस्यानुगतत्वं निरुच्य जन्यत्वेनैव ध्वंसकारणत्व-माशङ्कते **"न च कालिकसम्बन्धेन सत्तावत्त्वरूपजन्यत्वमेव निवेश्यता"**मित्य-नेन । ध्वंसकारणतावच्छेदकतयेति शेषः ।

**"तथा चे"**ति । प्रतियोगित्वसम्बन्धेन नाशं प्रति कालिकसम्बन्धेन सत्तावत्त्व-रूपजन्यत्वेन कारणत्वे । ध्वंसस्यापि नाशापत्तिरित्याह **"ध्वंसस्यापि नाशोऽस्त्वि"**ति । ध्वंसे कालिकेन सत्तावत्त्वरूपजन्यत्वसत्त्वादिति भावः ।

ननु जन्यत्वेन भावत्वेन वा ध्वंसकारणत्वमित्यनयोरेकतरस्मिन् विनिगमनाभावान्नि-रुक्तोभयरूपेणोभयस्य कारणत्वं कल्प्यमिति गौरवमित्यभिप्रेत्याशङ्कते **"पूर्वकल्पेऽपी-"**त्यादिना । भावत्वेन कारणताकल्पेऽपि विनिगमनाविरह इति भावः । पूर्वकल्पे ध्वंसस्य ध्वंसानापादनमेव विनिगमनेति समाधत्ते **"अनन्ताप्रामाणिक ध्वंसस्ये"**त्यादिना । जन्यत्वरूपेण कारणत्वोक्तौ तु ध्वंसस्य ध्वंसस्तस्यापि ध्वंस इत्येवंरीत्यानन्ताप्रामाणिकध्वंस-धारायास्तत्कारणानाञ्च कल्पने महद्गौरवम्, भावत्वेन कारणत्वे तु तदकल्पननिबन्धनं महालाघवमेव भावत्वेन कारणतायां विनिगमकमिति भावः ।

एतद् दृढीकर्तुमुपाधिवादीयदीधितिकारोक्तिमुल्लिखति-**"अनन्तध्वंसतत्कारणधारा-कल्पनातो ध्वंसानन्तत्वकल्पनाया एवोचितत्वा"**दिति । लाघवेनेत्यादिः । अग्रिमा-नन्तत्वमविनाशित्वम् ।

**यत्तु ध्वंसस्यापि ध्वंसस्वीकारे प्रतियोगिध्वंसप्रागभावानधिकरणकालस्य प्रतियोग्यधिकरणकालत्वनियमात् तद्घटोन्मज्जनापत्तिरेव विनिगमिकेत्याह, तन्न समीचीनम्, घटध्वंसस्यापि तदानीं घटो ध्वस्त इति प्रतीतिविषयत्वकल्पनात्। ननु सत्त्वेन ध्वंसत्वेन कार्यकारणभावस्थले कार्यस्य प्रतियोगिता कारणस्य तादात्म्यम्, इत्थञ्च प्रागभावनाशे व्यभिचारः, तादात्म्येन सतोऽसत्त्वात्।**

---

ध्वंसस्य ध्वंसस्वीकारे अन्यामनुपपत्तिमाशङ्कते "**यत्त्वि**"त्यादि "**ध्वंसस्यापि ध्वंसस्वीकारे·········तद्घटोन्मज्जनापत्तिरेव विनिगमिके**"त्यन्तेन। ध्वस्ततद्-घटस्य पुनराविर्भावापत्तिरित्यर्थः। तत्र हेतुमाह—'प्रतियोगिध्वंसप्रागभावानधिकरणकालस्य प्रतियोग्यधिकरणकालत्वनियमा'दिति सामान्यतः। विशेषतश्च घटध्वंसप्रागभावानधिकरण-कालस्य घटाधिकरणत्वनियमादिति। एतद्विशेषनियममनुसृत्याह 'घटोन्मज्जनापत्ति'रिति। अत्र 'ध्वंसप्रागभावानधिकरणकालस्य' तद्घटध्वंसप्रागभावानधिकरणकालस्येत्यर्थः। तद्घटाधिकरणत्वनियमादिति तद्घटध्वंसवतस्तत्प्रागभाववतश्च कालस्य न तद्घटाधि-करणत्वं कालिकेन विभिन्नकालीनवस्तुन आधाराधेयत्वास्वीकारात्। ध्वंसस्य ध्वंसस्वीकारे तादृशकालस्य न घटध्वंसवत्त्वम्, न वा घटप्रागभाववत्त्वम्, अतस्तस्य कालस्य कालिकेन घटाधिकरणत्वापत्तिर्निष्प्रत्यूहेति भावः।

आपत्तेराकारस्तु—घटादिध्वंसो यदि किञ्चित्कालवृत्तिध्वंसप्रतियोगी स्यात्, स्वानधिकरण-तत्कालकः स्यात्, अथवा स कालो यदि तद्घटप्रागभावध्वंसानधिकरणं स्यात्तद्-घटाधिकरणं स्यादित्याकारा। मतमेतद्दूषयति—"**तन्न समीचीनम्, घटध्वंसस्यापि तदानीं घटो ध्वस्त इति प्रतीतिविषयत्वकल्पना**"दित्यादिना।

तेषामयमाशयः—घटध्वंसवतः कालस्य घटानधिकरणत्वं सर्ववादिसिद्धम्, यत्र काले घटध्वंसस्य ध्वंसापत्तिस्तत्कालेऽपि घटो ध्वस्त इति व्यवहारात्, ध्वंसेन सह प्रतियोगिनो विरोधात् घटध्वंसवतः कालस्य घटाधिकरणत्वापत्तिरसङ्गतेति भावः। अत्रेदं चिन्तनीयम्—'सामग्रीसत्त्वेऽवश्यं कार्यम्' इति नियमात् तदानीं घटो ध्वस्त इति व्यवहारेऽपि ध्वंसस्य ध्वंससामग्री तादृशध्वंसरूपकार्यं कथं न जनयेत्, व्यवहाराभावस्य तादृशसामग्र्यघटकत्वात्, तादृशव्यवहारस्यान्यथैवोपपादनीयत्वात्। तथाहि तदानीं घटो ध्वस्त इत्यस्य ध्वंसप्रतियोगी घट एतत्कालवृत्तिरित्यर्थकत्वेनानुकूलगलहस्ततैव घटस्य पुनरुन्मज्जनवादिनामिति। अत्र तत्पदं ध्वंसाव्यवहितघटाधिकरणकालपरमिति ध्येयम्। वस्तुतस्तु यथा मतान्तरे प्रागभावप्रतियोगिनो घटादेर्ध्वंसः प्रागभावप्रतियोगिकः स्वीक्रियते, अन्यथा प्रतियोगि-

**न च भवन्मतेऽपि तथा जन्यभावत्वस्य प्रागभावेऽसत्त्वात्। न च जन्यभावत्वं प्रलयावृत्तित्वम्, प्रागभावस्य प्रलयावृत्तितया तादात्म्येन पूर्वकाले सत्त्वान्न व्यभिचार इति वाच्यम्,**

---

ध्वंसकाले प्रागभावोन्मज्जनप्रसङ्गः, तथा प्रतियोगिध्वंसध्वंसोऽपि प्रतियोगिध्वंसप्रतियोगि-प्रतियोगिकः प्रतियोगिनो घटादेर्ध्वंसस्वरूप उपेयते। तथाच तद्ध्वंसध्वंसाधिकरणकालस्यापि घटध्वंसाधिकरणतया घटोन्मज्जनप्रसङ्गस्य नापत्तिसम्भवः।

ध्वंसस्य ध्वंसस्वीकारे तस्यापि ध्वंस इति रीत्यानन्ताप्रामाणिकध्वंसधाराया अविश्रामा-दनन्तप्रागभावतद्ध्वंसतत्तत्प्रतियोगित्वानाञ्च कल्पनान्महागौरवमेव ध्वंसस्य ध्वंसापादने बाधकमित्येवं परमार्थतो ज्ञेयम्।

प्रतियोगित्वसम्बन्धेन ध्वंसं प्रति जन्यभावत्वेनकारणत्वकल्पनायां 'तत्र न देयमेव जन्यतावत्त्वम्' इति मूलेन कारणतावच्छेदककुक्षौ जन्यतानिवेशकृतगौरवमाशङ्क्य सत्त्वेनैव कारणत्वं कल्पितम्, इदानीं कार्यकारणतावच्छेदकसम्बन्धप्रदर्शनमुखेन तादृशकार्यकारणभावे व्यभिचारमाशङ्कते—"**ननु सत्त्वेन**"त्यादि "**इत्थञ्चे**'-त्यन्तेन। इत्थञ्च प्रतियोगित्वसम्बन्धेन ध्वंसं प्रति तादात्म्येन सत्त्वेन कारणत्व इत्यर्थः। व्यभिचारं स्फुटयति—"**प्रागभावनाश**" इत्यादिना। प्रागभावनाशे प्रतियोगित्व-सम्बन्धेन प्रागभावनाशस्थल इत्यर्थः। "**व्यभिचार**" इति प्रतियोगित्वसम्बन्धेन नाशवति प्रागभावे तादात्म्येन सतोऽसत्त्वात्। ध्वंसं प्रति सत्त्वेन कार्यकारणभावे कल्पिते जन्यभावत्वेन कारणत्ववादिभिः "प्रागभावनाशेऽसत्त्वादि"त्यनेन व्यभिचार आशङ्कितः। सत्त्वेन कारणत्ववादिभिः प्रतिवन्धिमुखेन जन्यभावत्वेन कारणत्ववादिमतेऽपि व्यभिचारतादवस्थ्यमाशङ्कते "**न च भवन्मतेऽपि तथा जन्यभावत्वस्य प्रागभावे ऽसत्त्वा**"दित्यनेन। 'भवन्मतेऽपि' जन्यभावत्वेन कारणत्ववादिमतेऽपीत्यर्थः। 'तथा' व्यभिचारः। व्यभिचारे हेतुमाह "प्रागभावेऽसत्त्वा"दित्यनेन। प्रतियोगित्व-सम्बन्धेन ध्वंसवति प्रागभावे तादात्म्यसम्बन्धेन जन्यभावस्यासत्त्वाद् व्यतिरेकव्यभिचार इति भावः। जन्यभावत्वेन कारणत्ववादिना पुनः "न च भवन्मतेऽपी"त्यत्र नञं सतोऽसत्त्वादित्यनन्तरमनुषज्य आशङ्कितव्यभिचारो निषिध्यते। "न चेति", सतो-ऽसत्त्वादिति न चेत्यर्थः। व्यभिचारनिषेधकं हेतुमाह "**न च जन्यभावत्वं प्रलया-वृत्तित्व**"मित्यादि। अत्रापि न चेति वाच्यमित्यनेन परेणान्वयः। जन्यभावत्वं न द्रव्यादिषट्कान्यतमत्वमपि तु प्रलयावृत्तित्वम्। प्रलयपदमत्रापि महाप्रलयपरं न तु प्रलय-

**प्रलयत्वस्य तत्तद्व्यक्तिभेदेनानन्ततयाऽनन्तकार्यकारणभावप्रसङ्गादिति चेन्न, भावत्वविशिष्टप्रतियोगितायाः सत्त्वादेवाव्यभिचारादिति।**

---

सामान्यपरम्। तथात्वे परमाणुक्रियादृष्टादिजन्यभावानां प्रलयवृत्तितयाऽसङ्गतिः। महाप्रलयश्चानन्तः। न हि कदाचित्तस्यावसानम्, येन पुनः सृष्टस्य प्रागभावापादनं प्रसज्येत। प्रागभावे प्रलयावृत्तित्वरूपपारिभाषिकजन्यभावत्वसम्पत्त्या व्यभिचाराभावं स्फुटयति "**प्रागभावस्य प्रलयावृत्तितये**"त्यादिना। प्रागभावस्य प्रलयावृत्तितयेति तादात्म्येन पूर्वकाले सत्त्वादित्यस्य हेतुः। 'पूर्वकाले' ध्वंसपूर्वकाले। प्रलयावृत्तिरूपजन्यभावस्य ध्वंसपूर्वकाले प्रागभावे [1]सत्त्वान्न व्यभिचार इति भावः। ननु प्रतियोगित्वसम्बन्धेन ध्वंसं प्रति तादात्म्येन जन्यभावस्य कार्यकालवृत्तितया कारणत्वात् कथं पूर्वकाले इत्युक्तमिति चेन्न, कार्यकालवृत्तेरपि कारणस्य कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यसामानाधिकरण्यसम्पत्त्यर्थं तदुक्तत्वात्, अन्यथा कारणलक्षणमेव तत्र विकलीभवेत्। सत्त्वेन कारणत्ववादी प्रलयावृत्तित्वरूपेणानुगतकारणत्वस्याशक्यकल्पनाकत्वं निरूच्य जन्यभावत्वेन कारणत्ववादिना प्रदर्शितव्यभिचाराभावं विघटयति—"**प्रलयत्वस्य तत्तद्व्यक्तिभेदेनानन्ततये**"-त्यादिना।

अयमेषामाशयः—यावतां जन्यभावानां ध्वंससमूह एव महाप्रलयः, समूहत्वं कूटत्वम्, कूटत्वञ्च धीविशेषविषयत्वरूपमननुगतम्, तथा च तत्तद्ध्वंसव्यक्तिघटितप्रलयावृत्तित्वेन कारणत्वे अनन्तकार्यकारणभावप्रसक्त्या प्रलयावृत्तित्वेन जन्यभावस्य कारणत्वकल्पनासम्भव इति भावः।

अत्रेदमवधातव्यम्—यावतां तत्तज्जन्यभावानां युगपदेककालोत्पन्नस्यैकस्यैव ध्वंसस्य स्वीकारे लाघवादेक एव ध्वंसो महाप्रलयः न तु ध्वंससमूह इति।

सत्त्वेन कारणत्ववादी प्रागभावमन्तर्भाव्य जन्यभावत्वेन कारणवादिना नन्वित्यादिना आशङ्कितव्यभिचारमुद्धरति "**भावत्वविशिष्टप्रतियोगितायाः सत्त्वादेवे**"त्यनेन। तथा च सामानाधिकरण्यसम्बन्धेन भावत्वविशिष्टप्रतियोगित्वसम्बन्धेन ध्वंसं प्रति

---

१ जन्यभावानां प्रागभावानाञ्च महाप्रलयावृत्तितया महाप्रलयावृत्तित्वमेव जन्यभावत्वम्। तथा च महाप्रलयाङ्गीकर्तृमते निरवसाने महाप्रलये केषामपि प्रागभावस्य जन्यभावस्य चासत्त्वात् प्रलयावृत्तित्वरूपजन्यभावत्ववतो जन्यभावस्य तादात्म्येन प्रागभावे सत्त्वं निरङ्कुशमेवेति निर्गलितार्थः।

तादात्म्येन सत्त्वेन कारणत्वकल्पनायां न व्यभिचारः, तादृशसम्बन्धेन ध्वंसस्य प्रागभावे असत्त्वादिति भावः ।

इदमत्रावधेयम्—सत्त्वं भावत्वम्, भावत्वञ्च द्रव्यादिषट्कान्यतमत्वम्, अन्यतमत्वञ्च भेद-कूटावच्छिन्नप्रतियोगिताकभेदवत्त्वम्, कूटत्वञ्च धीविशेषविषयत्वरूपमननुगतम्। तथाच तद्भेदविशिष्टतद्भेद इत्यादिरीत्या अन्यतमत्वनिर्वचने महद्गौरवं तदपेक्ष्य समवायेन सत्तावत्त्वमेव भावत्वमत्र निर्वाच्यम्, तथाच प्रतियोगित्वसम्बन्धेन ध्वंसं प्रति समवायसम्बन्धेन सत्तावच्छिन्नस्य तादात्म्येन कारणत्वकल्पनायां सत्ताया जातिरूपत्वेन महालाघवेन तन्निवेशनमेव ज्यायः। न च प्रागभावमन्तर्भाव्य व्यभिचार इति वाच्यम् भवन्मते भावत्वविशिष्ट-प्रतियोगिताया इव सामानाधिकरण्यसम्बन्धेन सत्ताविशिष्टप्रतियोगिताया एवास्माभिः कार्यतावच्छेदकसंसर्गत्वेन निवेश्यत्वात् ।

न च नित्यानां तत्र नाशापत्तिरिति वाच्यं विशेषसामग्रीसमवहिताया एव सामान्य-सामग्र्या फलोपधायकत्वात् नित्यस्थले विशेषकार्यकारणकल्पनस्यानावश्यकतया नाशापत्ति-वारणात् ।[1]

न च तथापि कारणतावच्छेदकभावत्ववन्नित्यान्तर्भावे अन्वयव्यभिचारः, नित्ये प्रतियोगित्वसम्बन्धेन ध्वंसासत्त्वादिति वाच्यम्, अन्वयव्यभिचारग्रहस्य ग्राह्यमुद्रयाऽ-प्रतिबन्धकत्वात्, अन्यथासिद्धिमुद्रया कारणताविघटकत्वास्वीकाराद्दोषाभावात् ।

एतद्घटनाशकालीनैतद्घटसमवेतनाशं प्रति स्वप्रतियोगिसमवेतत्वसम्बन्धेनैतद्-घटनाशस्य कार्यकारणभावकल्पनमहिम्ना एतद्घटनाशकालीनैतद्घटसमवेतघटत्वस्य नाशापत्तिस्तत्रापि स्वप्रतियोगिसमवेतत्वसम्बन्धेन घटनाशस्य सत्त्वात्, तद्वारणाय

1 यानि तावज्जन्यद्रव्याणि, जन्यगुणाः, कर्माणि च तान्यन्तर्भाव्यैव प्रत्येकं सप्रयोजना विशेषसामग्र्यः कल्प्यन्ते। यथा मूलकृन्मते प्रतियोगित्वसम्बन्धेन घटान्यप्रतियोगिकध्वंसं प्रति घटभेदस्य पटान्यप्रतियोगिकध्वंसं प्रति च पटभेदस्येत्यादिरीत्या जन्यद्रव्यस्थले रूपान्य-प्रतियोगिकध्वंसं प्रति रूपभेदस्य रसान्यप्रतियोगिकध्वंसं प्रति च रसभेदस्येत्यादिरीत्या जन्यगुण-स्थले, एवंरीत्या कर्मस्थलेऽपि कार्यकारणभावः। जगदीशगदाधरपादानां मते तु प्रतियोगित्वसम्बन्धेन घटादिध्वंसं प्रति तादात्म्येन घटादेः, रूपादिध्वंसं प्रति तादात्म्येन रूपादेः कारणत्वमितिरीत्या कार्यकारणभावः। अतिविशेषकार्यकारणभावस्तु तत्तद्व्यक्तित्वेन ध्वंसं प्रति तत्तद्व्यक्तित्वेन कारणत्वमित्येवंरीत्या सर्वत्रैव विशेषातिविशेष-कार्यकारणभावकल्पनं सप्रयोजनम्। नित्यस्थले च न किञ्चित् प्रयोजनमिति भावः ।

**विशृङ्खलास्तु तद्घटनाशकालीनत्वादेः कार्यतावच्छेदककोटौ तत्तत्क्रियाकालीनत्वादेर्वा निवेशे विनिगमनाविरहेनानन्तकार्यकारणभावकल्पनप्रसङ्गात्, तदुपेक्ष्य तत्तद्रूपनाशत्वं कार्यतावच्छेदकं वक्तव्यम्, तथाच घटत्वनाशकारणत्वाकल्पनादेवापादकाभावे न तदर्थं जन्यभावत्वेन कार्यकारणभावकल्पनम्,**

---

प्रतियोगित्वसम्वन्धेन ध्वंसं प्रति तादात्म्यसम्वन्धेन जन्यभावस्य कारणत्वं पूर्वं कल्पितम्[1]। इदानीं विनिगमनाविरहादेतद्घटनाशकालीनैतद्घटनाशं प्रतीत्यादि कार्यकारणभावकल्पनस्याशक्यत्वप्रदर्शनेन ध्वंसं प्रति जन्यभावस्य कारणत्वस्याप्यनावश्यकत्वमाशङ्कयते **"विशृङ्खलास्तु तद्घटनाशकालीनत्वादे"**रित्यादि। विनिगमनाविरहं स्फुटयति—**"तत्तत्क्रियाकालीनत्वादेर्वे"**ति। अत्र तत्तत्क्रियापदेन घटनाशोत्पादपर्यन्तस्थायिन्यस्तत्तत्क्रिया एव ग्राह्याः।

यथैतद्घटनाशकालीनो यो घटसमवेतः तन्नाशं प्रतीत्यादिरीत्या कार्यकारणभावः कल्प्यते, तथा तत्तत्क्रियाकालीनो यो घटसमवेतः तन्नाशं प्रति घटनाशस्य कारणत्वमित्यादिरीत्या कार्यकारणभावकल्पनमप्यौचित्यावर्जितमेव। तथा च तत्तत्क्रियाभेदेन कार्यकारणभावस्यानन्त्यापत्तिः। तत्तत्क्रियाकालीनत्वादेरित्यत्र आदि पदेन घटनाशोत्पत्तिकालमात्रपर्यन्तस्थायिनाञ्चान्येषां परिग्रहः।

विनिगमनाविरहस्य फलमाह **"अनन्तकार्यकारणभावकल्पनप्रसङ्गा"**दिति। तथाच तत्क्रियाकालीनत्वैतत्क्रियाकालीनत्वादिभेदभिन्नभेदघटितकार्यकारणभावानामानन्त्यप्रसङ्गेन एतद्घटनाशकालीनघटसमवेतनाशं प्रति एतद्घटनाशस्य कारणत्वमितिरीत्या कार्यकारणभावकल्पनमशक्यमेवेति भावः। ननु तादृशकार्यकारणभावस्याशक्यकल्पनीयत्वे कीदृशः कार्यकारणभावः कल्पनीयो येन घटत्वनाशो नापद्येतेत्याकाङ्क्षायामाह—**"तदुपेक्ष्य तत्तद्रूपनाशत्वं कार्यतावच्छेदकं वक्तव्य"**मिति। प्रतियोगित्वसम्बन्धेन रूपनाशं प्रति तादात्म्येन रूपत्वेन, रसनाशं प्रति च तादात्म्येन रसत्वेन विशेषकार्यकारणभावः कल्पनीय इत्यर्थः। तत्कल्पनाफलमाह **"तथाच घटत्वनाशकारणत्वा-**

---

1 जन्यभावत्वेनेत्यत्र भावत्वं समवायेन सत्तावत्त्वरूपमनुगतमिति टीकाकृद्भिरुक्तम्। तत्र जन्यत्वमपि महाकालान्यत्वविशिष्टसत्तावत्त्वरूपम्। सत्तावत्त्वञ्च कालिकसम्बन्धेन, महाकालान्यत्वविशिष्टकालिकेन सत्त्वावत्त्वं वेत्यनुगतं कारणतावच्छेदकघटकतया निवेश्यम्। उभयत्र वैशिष्ट्यञ्च सामानाधिकरण्यसम्बन्धेनेति सुधीभिर्विवेच्यम्।

**एवञ्च तन्नाशस्य प्रतियोगित्वसम्बन्धेन वान्यत्रापत्तिवारणाय तत्त्वेन हेतुत्वस्वीकारे घटत्वनाशे प्रतियोगिनः कारणत्वं [न] कल्प्यते, तथाच किं जन्यभावत्वावच्छिन्नकारणत्वस्वीकारेण? न च**

---

**कल्पनादेवापादकाभावे ने**"त्यादि। अत्र "आपादकाभावे" इत्यनन्तरं सतीति पूरणीयम्, नेति च "कल्पन"मित्यग्रिमान्वयि। एवञ्च रूपध्वंसं प्रति तादात्म्येन रूपत्वेन, रसध्वंसं प्रति च तादात्म्येन रसत्वेनेत्यादिरीत्या घटसमवेतसकलप्रतियोगिकानां ध्वंसानां हेतुहेतुमद्भावकल्पनाद् घटसमवेतसामान्यं प्रति हेतुत्वाकल्पनाच्च। आपादकाभावे सति घटत्वध्वंसापादकाभावे सतीत्यर्थः, **'तदर्थं'** घटत्वनाशवारणार्थम्, **'जन्यभावत्वेन'** नाशत्वेन, **'कार्यकारणभावकल्पनं'** नेति भावः। अथवा आपादकाभावेनत्येकवाक्यत्वे कार्यकारणभावाकल्पनमिति मूलपाठः, न तु कार्यकारणभावकल्पनमिति द्रष्टव्यम्। अयमत्राशयः—वस्तुतो नाशप्रतियोगिनो ये घटादिसमवेता रूपरसादयस्तानन्तर्भाव्यैव कार्यकारणभावकल्पनाद् घटत्वनाशकारणत्वाकल्पनाच्च, आपादकाभावेनैव न घटत्वनाशापत्तिरतस्तद्वारणार्थं जन्यभावत्वेन कारणत्वकल्पनमनावश्यकमिति भावः।

उक्तनिरुक्तेस्तात्पर्यमुपवर्णयन्नुपयोगितामाह "**एवञ्च**"त्यादिना। एकाश्रितरूपरसादिप्रतियोगिकध्वंसानां समनैयत्येन रूपध्वंसस्य रसे, रसध्वंसस्य रूपे, तत्तद्रूपादिध्वंसस्य चैतद्रूपादौ वारणाय विलक्षणप्रतियोगित्वसम्बन्धेन रूपादिध्वंसं प्रति तादात्म्येन रूपादित्वेन तत्तद्रूपादिध्वंसं प्रति च तत्तद्रूपादित्वेन कारणत्वकल्पनमावश्यकम्, अनावश्यकञ्च घटत्वनाशे कार्यकारणभावकल्पनम्, घटत्वस्य नाशाप्रतियोगित्वात्। तस्मात् क्लृप्तकारणासम्बलनाच्च न घटत्वनाशापत्तिः, अलं ध्वंसं प्रति जन्यभावत्वेन कारणत्वकल्पनेनेति निर्गलितार्थः।

"**प्रतियोगिनः**" घटत्वस्य, "**कारणत्वं**" विलक्षणप्रतियोगित्वसम्बन्धेनेति शेषः। "**कल्प्यते**" इत्यत्र "न कल्प्यते" इत्येव पाठः सङ्गतार्थकः। न कल्प्यते प्रयोजनाभावादिति शेषः।

यद्वा "**तन्नाशस्य**" रूपादिनाशस्य, "**अन्यत्र**" रसादौ, "**आपत्तिवारणाय**" प्रतियोगितासम्बन्धेन रूपनाशस्य रसादौ आपत्तिवारणाय, समनियतध्वंसानामैक्यात् "**तत्त्वेन**" रूपाद्यन्यप्रतियोगिकभेदत्वेन रूपादिनाशं प्रति, रसाद्यन्यप्रतियोगिकभेदत्वेन रसादिध्वंसं प्रति च "**हेतुत्वस्वीकारे**"। "**घटत्वनाशे प्रतियोगिनः**" इत्यत्र षष्ठ्यर्थो निष्ठत्वम्, अन्वयश्चास्य "**कारणत्व**"मित्यनेन। प्रतियोगिघटत्वनिष्ठकारणत्वं प्रतियोगित्वसम्बन्धेन घटत्वनाशं प्रति घटत्वान्यप्रतियोगिकभेदत्वेनेति शेषः। 'न कल्प्यते' प्रयोजना-

**सामान्यकार्यकारणभावास्वीकारे तन्नाशं प्रति तस्य जन्यसाधारणाखण्डभेद-मादाय विनिगमनाविरहेण कार्यकारणभावकल्पनापेक्षया जन्यभावत्वेन कार्य-कारणभावः कल्प्यते, तथा च तादात्म्यसम्बन्धेन यस्य सामान्यरूपेणैव**

---

भावात्। अन्यत् समानम्। इदञ्च व्याख्यानं प्रतियोगिताया वैलक्षण्यमस्वीकर्तुर्मूल-कारस्याशयमनुसृत्य कृतम्।

जन्यभावत्वेन कारणत्वमुपपादयितुमुपन्यस्यति "**न चे**"त्यादि। न चेत्यादौ इतीति योजनीयः, न चेत्यनन्तरञ्च "यतः" इति पाठः पूरणीयः। तथाच किं जन्यभावत्वावच्छिन्न-कारणत्वस्वीकारेणेति, न च, यतः इत्यन्वयबललभ्यः। निरुक्तसामान्यकार्यकारणभावास्वीकारे क्षतिं तत्स्वीकारे च युक्तिमाह "**सामान्यकार्यकारणाभावास्वीकार** इत्यादि **विनिगमनाविरहेण कार्यकारणभावकल्पनापेक्षये**"त्यन्तेन। अयमेषामाशयः—पूर्वं प्रतियोगित्वसम्बन्धेन रूपादिनाशं प्रति रूपाद्यन्यप्रतियोगिकभेदत्वेन विशेषकार्य-कारणभावे तत्तद् रूपत्वादिनाशं प्रति तत्तद्रूपान्यप्रतियोगिकभेदत्वेनातिविशेषकार्यकारण-भावे च कल्पिते, परित्यक्ते च जन्यभावत्वावच्छिन्नकारणत्वे, यद्विशेषे यद्विशेषस्य तत् सामान्ये तत् सामान्यस्येति न्यायमर्यादालङ्घनभिया जन्यसामान्यमन्तर्भाव्यापि सामान्यकार्यकारण-भावान्तरकल्पनस्यावश्यकत्वम्। तादृशकल्पनस्य च लाघवरूपयुक्तिमूलकत्वं प्रागेव प्रपञ्चितम्। कोऽसौ सामान्यकार्यकारणभावः यो निरुक्तविशेषकार्यकारणभावसरणिं नातिक्रमेत्? इत्या-काङ्क्षायामाह—"**जन्यसाधारणाखण्डभेदमादाये**"ति। जन्यसाधारणभेदं यावज्जन्य-गतभेदमित्यर्थः। तथा च प्रतियोगित्वसम्बन्धेन ध्वंसं प्रति जन्येतरप्रतियोगिकभेदत्वेन कारणत्वमिति पूर्वोक्तविशेषकार्यकारणभावानुगः सामान्यकार्यकारणभावः।

तद्दूषयति "**विनिगमनाविरहेण कार्यकारणभावकल्पनापेक्षये**"त्यनेन। अत्र मूलकृतामयमभिप्रायः—जन्यत्वं प्रागभावप्रतियोगित्वम्, प्रतियोगित्वञ्च प्रतियोगि-व्यक्तिभेदभिन्नम्, तथा च प्रातिस्विकरूपेण तत्तत्प्रतियोगित्वावच्छिन्नेतरभेदत्वेन कार्यकारणभावे विशेषकार्यकारणभाव एव पर्यवसानान्न सामान्यकार्यकारणभावसिद्धिरतो जन्यभावत्वेनैव कारणत्वस्यौचित्यमाह—"**जन्यभावत्वेन कार्यकारणभावः कल्प्यत**" इति। न च प्रागभावप्रतियोगित्वरूपजन्यत्वस्य भिन्नत्वेऽपि प्रतियोगितात्वरूपेणानुगमस्य प्रतियोगितात्वा-वच्छिन्नप्रतियोगित्वावच्छिन्नेतरभेदत्वेन कारणत्वकल्पने नाननुगतत्वमिति वाच्यम्, तथात्वे घटाभावीयतादृशप्रतियोगितायाः पटे सत्त्वापत्तेः। न च तत्तत्प्रतियोगित्वावच्छिन्न-भेदकूटावच्छिन्नप्रतियोगिताकभेदत्वेनैवानुगतकार्यकारणभावः कल्पनीय इति वाच्यम्,

कूटत्वस्य धीविशेषविषयत्वरूपतया तद्धीविशिष्टतद्धीविषयत्वादिरूपेण निवेशनस्यावश्यकत्वेनाननुगतत्वतादवस्थ्यादिति ध्येयम् ।

यद्वा प्रतियोगित्वसम्बन्धेन ध्वंसं प्रति जन्येतरप्रतियोगिकभेदत्वेन सामान्यतः कारणत्वे विनिगमनाविरहाद् भावेतरप्रतियोगिकभेदत्वेनापि कारणत्वकल्पनमुपेक्षानर्हं तथा च गुरुशरीरकारणताद्वयकल्पने महद्गौरवमाशङ्क्य एकस्मिन्नेव जन्यभावत्वावच्छिन्नकारणत्वकल्पने लाघवमाह "जन्यभावत्वेन कार्यकारणभावः कल्प्यत" इति। लाघवादिति शेषः। ननु ध्वंसं प्रति निरुक्तकार्यकारणभावद्वयकल्पने जन्येतरप्रतियोगिकभेदवतो ध्वंसस्य, भावेतरप्रतियोगिकभेदवतो नित्यस्य च ध्वंसापत्तिरूपगुरुतरदोषमुपेक्ष्य गुरुशरीरकारणताद्वयकल्पनमात्रदोषेण तदुपेक्षणमनुचितमिति वाच्यम्, जन्यभावत्वेन कारणत्वेऽप्येतादृशापत्तेः सम्भवात् तत्समाधानरीत्या अस्या अपि शङ्कायाः समाधास्यमानत्वात्। तथाहि अत्र जन्यत्वविशिष्टभावत्वेन भावत्वविशिष्टजन्यत्वेन च गुरुशरीरकारणताद्वयप्रसक्त्या जन्यत्वेनैकं भावत्वेन चापरं कारणत्वं कल्पनीयम्। कार्यतानिरूपितकारणतावच्छेदकानि यावन्ति तत्प्रत्येकावच्छिन्नानां यावतां सम्वलनादेव कार्योत्पादनियमेन यथा तादात्म्येन भावत्वावच्छिन्नस्यासम्वलनात् ध्वंसस्य जन्यत्वावच्छिन्नासम्वलनाच्च नित्यस्य च न नाशापत्तिस्तथाऽत्राप्यवसेयमिति। तथाहि यत्र जन्येतरप्रतियोगिकभेदभावेतरप्रतियोगिकभेदयोः सम्वलनम्, कारणतावच्छेदकानि यावन्ति इत्यादि नियमेन तत्रैव प्रतियोगित्वसम्बन्धेन ध्वंसापत्तिसम्भवात् भावेतरप्रतियोगिकभेदासम्वलनात् ध्वंसस्य, जन्येतरप्रतियोगिकभेदासमभिव्याहाराच्च नित्यस्य न ध्वंसापत्तिरिति भावः।

ननु यद्विशेषे यद्विशेषस्य तत् सामान्ये तत् सामान्यस्येति किं श्रुतिर्गुरोरादेशो वा, येन युक्तिमन्तरेणापि स न्यायो ग्रहीतव्यः। युक्तिप्राधान्यवादिभिर्नैयायिकैः श्रुतेरपि दार्ढ्यार्थं युक्तेनामवतारितत्वादिति चेन्न, युक्तेरपि सौलभ्यात्। कार्यसामान्याभावप्रयोजकतावच्छेदकस्य लाघवार्थं तस्यावश्यकत्वात्। तथाहि तादृशसामान्यकार्यकारणभावास्वीकारे प्रतियोगित्वसम्बन्धावच्छिन्नध्वंसत्वावच्छिन्नप्रतियोगिताकाभावप्रयोजकतावच्छेदकत्वस्यानायत्या तत्तज्जन्याभावसमुदायत्वे स्वीकारस्यावश्यकत्वेन गौरवम्, एकस्मिन् जन्यभावत्वावच्छिन्नप्रतियोगिकाभावत्वे स्वीकारे च महालाघवम्। यथा तत्तदनुमितिव्यक्तिं प्रति तत्तत्परामर्शव्यक्तित्वेन विशेषकार्यकारणभावस्वीकारेऽपि अनुमितिसामान्याभावप्रयोजकतावच्छेदकत्वस्य तत्तत्परामर्शव्यक्तित्वावच्छिन्नाभावकूटत्वे स्वीकारापेक्षया व्याप्तिपक्षधर्मताविशिष्टज्ञानत्वरूपपरामर्शत्वावच्छिन्नप्रतियोगिताकाभावत्वे स्वीकारे लाघवम्। एवंरीत्या अन्यत्रापि बोध्यम्।

**कारणता तस्यैव विशेषरूपेण कार्यकारणभावः कल्प्यत इति भेदादेः स्वरूपतो हेतुत्वकल्पनमिति दिक्।**

**इति महामहोपाध्याय श्रीहरिरामतर्कालङ्कारविरचितं ध्वंसजन्यभावयोः कार्यकारणभावरहस्यं समाप्तम्।**

---

एतावता जन्यभावत्वेन कारणत्वकल्पनध्रौव्ये "यद्विशेषे यद्विशेषस्य तत्सामान्ये तत्सामान्यस्यैव यत् सामान्ये यत् सामान्यस्य तद्विशेषे तद्विशेषस्ये"त्यपि न्यायात् अत्र विशेषकार्यकारणभावकल्पनस्याप्यावश्यकत्वमाह—"**तथा च तादात्म्यसम्बन्धेन यस्य सामान्यरूपेणैव कारणते**"त्यादि "**भेदादेः स्वरूपतो हेतुत्वकल्पनमिति दि**"गित्यन्तेन। प्रतियोगित्वसम्बन्धेन रूपनाशं प्रति रूपान्यप्रतियोगिकभेदस्य, रसनाशं प्रति रसान्यप्रतियोगिकभेदस्य, तद्रूपादिनाशं प्रति च प्रतियोगिभेदस्य हेतुत्वकल्पनमित्यर्थः। प्रयोजनञ्चास्य समनियतरूपरसादिध्वंसानामैक्यात् रसादौ रूपादिध्वंसस्य, षोडशकार्यकारणभावस्य च वारणं मूलकारेण प्रतियोगिताया वैलक्षण्यास्वीकारादिति प्रागेव प्रपञ्चितम्।

जन्यभावत्वेन सामान्यकारणतास्थले विशेषकारणता च रूपाद्यन्यप्रतियोगिकभेदत्वेन कल्पिता मूलकारेण। अत्रेदमालोचनीयम्—यद्धर्मावच्छिन्नसामान्यकारणता तद्धर्मन्यूनवृत्तिधर्मावच्छिन्नकारणतैव तत्स्थलीयविशेषकारणता। न्यूनवृत्तित्वञ्च, तत् समानाधिकरणत्वे सति तत्समानाधिकरणभेदप्रतियोगितावच्छेदकत्वम्, सामान्यधर्मव्यधिकरणधर्मस्य न्यूनवृत्तित्ववारणार्थं सामानाधिकरण्यदलम्, सामान्यधर्मव्यापकसत्त्वप्रमेयत्वादेर्न्यूनवृत्तित्ववारणार्थं विशेष्यदलम्। एवञ्च रूपाद्यन्यप्रतियोगिकभेदत्वस्य भावत्वसामानाधिकरण्याभावात् कथं भावत्वन्यूनवृत्तित्वम्? तर्कालङ्कारपादैस्तु न्यूनवृत्तिधर्मसमानाधिकरणवृत्तिधर्मावच्छिन्नकारणता न्यूनवृत्तिधर्मघटितधर्मावच्छिन्नकारणता वा विशेषकारणता मन्यते इति मन्यामहे। तथा च जन्यभावत्वन्यूनवृत्तिधर्मो रूपत्वादिकं तत्समानाधिकरणवृत्तिधर्मो रूपाद्यन्यप्रतियोगिकभेदत्वमिति सङ्गतिः। अभावानां समनैयत्येऽपि प्रतियोगिभेदभिन्ना प्रतियोगिता विलक्षणा, वैलक्षण्यञ्च रूपत्वाच्छिन्नत्वादिना, एवञ्च समनियतध्वंसानामैक्येऽपि प्रतियोगिताया विभिन्नत्वेन रूपत्वावच्छिन्ना प्रतियोगिता रूप एव न तु तदन्यस्मिन्, रसत्वावच्छिन्नप्रतियोगिता रस एव न तु तद्भिन्नेषु, अतो न रूपध्वंसस्य तादृशप्रतियोगित्वसम्बन्धेन रसे, रसध्वंसस्य च तदितरे प्रसक्तिः। नो वा पूर्वोक्तानां षोडशकार्यकारणभावानामापत्तिः। समनियताभावीयप्रतियोगित्वानाम-

वैलक्षण्ये सोन्दडानामपि व्यधिकरणधर्मावच्छिन्नाभावसाधनमशक्यं स्यात्, वह्नित्वेन घटो नास्ति घटत्वेन वह्निर्नास्ति, गगनं नास्तीत्यादिसमनियताभावीयप्रतियोगितायाः समानाधिकरणधर्मावच्छिन्नत्वात् ।

अत एव चिन्तामणिकृद्भिरपि प्रतियोगितायाः समानाधिकरणधर्मावच्छिन्नत्वमनाशङ्क्य प्रकारान्तरेण प्रतियोगिताया व्यधिकरणधर्मावच्छिन्नत्वं दूषितम् । एवञ्च प्रतियोगिताया वैलक्षण्यसिद्धौ रूपादौ रसादिध्वंसस्य, रसादौ च रूपादिध्वंसस्य वारणाय प्रतियोगित्व-सम्बन्धेन रूपध्वंसं प्रति रूपान्यप्रतियोगिकभेदत्वेन तादृशसम्बन्धेन रसध्वंसं प्रति च रसान्यप्रतियोगिकभेदत्वेन गुरुशरीरविशेषकार्यकारणभावकल्पनाया अप्यनावश्यकत्वम्, प्रतियोगित्वसम्बन्धेन रूपध्वंसं प्रति तादात्म्येन रूपत्वेन, तादृशसम्बन्धेन रसध्वंसं प्रति तादात्म्येन रसत्वेनेत्यादिरीत्या लघुशरीरकार्यकारणत्वकल्पनयैव चरितार्थत्वात् । रूप-ध्वंसीयप्रतियोगिताया रसे, रसध्वंसीयप्रतियोगितायाश्च रूपेऽसत्त्वात् ।

प्रतियोगिताया वैलक्षण्यमनङ्गीकृत्य कल्पितनिरुक्तकार्यकारणभावे समनियताभावा-नामैक्ये व्यभिचारोऽपि दुरुद्धरः स्यात्, प्रतियोगित्वसम्बन्धेन रूपध्वंसवति रसे रूपान्य-प्रतियोगिकभेदस्यासत्त्वादिति सुधीभिर्विभावनीयम् ।

एतावता मूलकृता अन्यैरनुशीलितेन पथा विचारचातुरीप्रयोगेन सर्वा अनुपपत्तीर्निराकृत्य प्रतियोगित्वसम्बन्धेन ध्वंसं प्रति तादात्म्येन जन्यभावस्य कार्यकारणभाव उपपादितः । तत्र विनिगमनाविरहात् जन्यत्वविशिष्टभावत्वेन भावत्वविशिष्टजन्यत्वेन च लाघवतो लघुशरीरं कारणताद्वयकल्पनमेव मूलकृतोऽप्यभिप्रेतमिति मन्ये । तत्र च जन्यत्वं महाकालान्यत्व-विशिष्टसत्तावत्त्वम्, सत्तावत्त्वञ्च कालिकसम्बन्धेन । महाकालान्यत्वविशिष्टकालिकेन सत्तावत्त्वं वा, न तु प्रागभावप्रतियोगित्वम्, नो वा तत्तदन्यथासिद्ध्यभावकूटनिरूपितत्वे सति तत्तदन्यथासिद्धिकूटत्वावच्छिन्नाभावनिरूपितत्वे सति वा नियतपूर्ववर्तिताकत्वरूपम् । स्वसामानाधिकरण्य--स्वाव्यवहितोत्तरत्व-स्वनिष्ठा-[1]नन्यथासिद्धत्वनिरूपितत्वैतत्त्रितयसम्बन्धेन किञ्चिद्विशिष्टत्वरूपं वा । प्रतियोगितायाः प्रतियोगिभेदभिन्नत्वेन अननुगताभ्यां कूटत्वनियतपूर्ववर्तिताकत्वाभ्यां घटितत्वेन चाननुगतत्वात् । अत्र कारणतावच्छेदक-भावत्वमपि समवायेन सत्तावत्त्वरूपम् । न तु षड्द्रव्यसाधारणद्रव्यषट्कान्यतमत्वम् । एतेनाननुगतकूटत्वघटितान्यतमत्वगर्भितत्वेन भावत्वस्याप्यननुगतत्वशङ्का व्युदस्ता । इदञ्च क्वचित् प्रागुक्तमपि ग्रन्थार्थसारसङ्कलनपरतया सप्रयोजनत्वात् पुनरुक्तिदोषं नार्हतीत्यवधेयम् ।

---

1 तत्तदन्यथासिद्धिमद्भेदकूटवत्त्वम् ।

केचित्तु प्रतियोगित्वसम्बन्धेन ध्वंसं प्रति तादात्म्येन भावत्वेनैवैकं कारणत्वं कल्पयन्ति। विशेषकार्यकारणभावसमवहितसामान्यकार्यकारणभावस्यैव फलजनकत्वनियमेन नित्यस्थले विशेषसामग्रीकल्पनस्यानावश्यकत्वेन न नित्यस्य नाशापत्तिः, न वा अन्वयव्यभिचारस्य च ग्राह्यमुद्रया कारणत्वग्रहाप्रतिबन्धकत्वात् काप्यनुपपत्तिरिति वदन्ति।

अन्ये तु नञर्थाविषयकप्रतीतिविषयत्वरूपं भावत्वं जन्यभावत्वेनेत्यत्र कारणतावच्छेदक-घटकतया निवेशयन्ति। नन्वेवं घटाभाववान् घटाभाव इत्यादिनञर्थविषयकप्रतीतिविषये घटे भावलक्षणाव्याप्तिरिति चेन्न, ज्ञानीयनञर्थनिष्ठविशेष्यताभिन्नविशेष्यतावत्त्वस्यैव निरुक्त-ग्रन्थतात्पर्यात्। तथाच नञर्थनिष्ठविशेष्यताभिन्नाया घटत्वनिष्ठनिरवच्छिन्नप्रकारतानिरूपित-विशेष्यताया घटे सत्त्वान्नानुपपत्तिः। न च द्रव्यादिषट्कान्यतमत्वरूपभावत्वं कथमुपेक्षित-मिति वाच्यम्, अन्यतमत्वस्य कूटत्वघटिततया कूटत्वस्य चाननुगतत्वादनुगतभावत्वनिरूपणार्थ-मेतस्यावश्यकत्वात्।

न च तथापि अन्योन्याश्रयस्य चक्रकस्य वा प्रसक्तिरत्र केन वार्यते? तथा हि नञर्थोऽभावः, अभावस्य च भावभिन्नरूपतया भावग्रहसापेक्षग्रहसापेक्षग्रहकत्वं भावग्रहसापेक्ष-ग्रहसापेक्षग्रहसापेक्षग्रहकत्वं वा सुघटमिति चेन्नैवं नञर्थत्वेनैव नञर्थस्यात्र निविष्टत्वान्न तु भावभिन्नत्वरूपेणेति।

न चात्रापि भेदस्य तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावरूपतया लाघवानवकाश इति वाच्यं भेदत्वस्याखण्डोपाधित्वमतमाश्रित्य निरुक्तलक्षणकरणात्। एतेनान्योन्याश्रय-चक्रकशङ्काऽपि निरस्ता[1]। समवायेन सत्तावत्त्वापेक्षयाऽस्य गुरुत्वेऽपि सर्वभावसाधारणानु-गतभावत्वनिवेशेनैवोपपत्तौ निरुक्तकार्यकारणभावघटकभावत्वसङ्कोचस्यानावश्यकत्वमित्येषामभि-मान इति दिक्।

शाके खजीवाष्टविधुप्रमाणे रवेर्भषे संक्रमणे समाप्तिम्।
गदाधरस्यात्र गुरोर्निबन्धे गुरोः प्रसादाद् विवृतिर्गतेयम्॥

पण्डितवर्याणां श्रीमदुमाकान्तन्यायरत्नभट्टाचार्याणामात्मजेन
श्रीयामिनीकान्ततर्कतीर्थभट्टाचार्येण
विरचिता 'सुबोधिनी' नाम्नी टीका समाप्ता।

---

1 भेदत्वस्याखण्डोपाधित्वास्वीकारे निरुक्तरीत्याऽन्योन्याश्रयस्य चक्रकस्य वा प्रसक्ति-रित्याशयः।

# शुद्धिपत्रकम्

| पत्रम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १ | १३ | शब्द एव | शब्दोऽपि |
| २ | ४ | ...दन्त | ...वन्त |
| : | १५ | पक्षेतरत्वस्य | पक्षत्वस्य |
| ८ | ७ | ...सम्वन्धेन सत्ता | ...सम्बन्धेन महाकालान्यत्वविशिष्टसत्ता- |
| ,, | २१ | ...दान... | ...दन... |
| ,, | २४ | ...जन्यत्वप्र | ...जन्यत्वाप्र... |
| ६ | २७ | तत्सत्ताया | सत्ताया |
| १० | १ | द्रव्यनाश | द्रव्यसमवेतनाश |
| ,, | १५ | द्रव्यनाश | द्रव्यसमवेतनाश |
| ,, | १६ | द्रव्यनाश | गुणनाश |
| ११ | ५ | कल्पे च | कल्पे च न तथा |
| १३ | ४ | ह्रदो जलवान् वह्निमांश्चेत्यायां | जलवद्ह्रदो वह्निमानित्यां |
| ,, | ५ | चिन्तावीजन्तु | वस्तुतस्तु |
| ,, | १२ | तदभावम् | तदभावः |
| १४ | १३ | सिद्धान्तितत्वात् | सिद्धान्तितम्। तत्त्वेदं भावनीयम्— |
| ,, | १५-१६ | एतेन...मपीति, तन्न मनोरमम् | अन्यच्च |
| ,, | १७ | त्वाद्, | त्वम्, |
| १५ | १६ | सङ्गतेरिति | सङ्गतिरिति |
| १६ | १६ | ...त्वम्बन्धेन | ...त्वसम्वन्धेन |
| ,, | २५ | प्रत्येकान्न... | प्रत्येकन्न... |
| २४ | ८ | ...योगित्वस्य | ...योगिताकत्वस्य |
| ,, | १३ | ...योगित्वा | ...योगिताकत्वा |

*Calcutta Sanskrit College Series of Text and Studies.*

## ALREADY PUBLISHED :

### Texts :

| | | Rs. |
|---|---|---|
| 1 | **Chandogya Brahmana (Mantra Brahmana)** of the Sāmaveda—edited with the Bhāṣyas of Guṇaviṣṇu and Sāyana, Critical Notes and Introduction by —*Durgamohan Bhattacharyya*, M.A., Kāvya-Sānkhya-Purāṇatīrtha, | 15·00 |
| 2 | **Ravanavaho** (Setubandha) of **Pravarasena**—edited with **Setutattvacandrika**, a newly-discovered Sanskrit commentary, by— *Dr. Radhagovinda Basak*, M.A,, Ph.D, ... ... ... | 40·00 |
| 3 | **Kavyaprakasa** of **Mammata** (Part I, Ullasas I-IV)—edited with the **Kavyaprakasa-viveka** of **Sandhivigrahika Sridhara** (13th century), the third earliest commentary available at present by— *Sivaprasad Bhattacharyya*, M.A. ... ... ... | 12·00 |
| 4 | **Jnanalaksanavicararahasyam** of **Harirama Tarkalankara-Tarkavagisa**—edited with a Critical Commentary of Pandit Ananta Kumar Nyāya-Tarkatīrtha and an Introduction by *Dr. Gaurinath Sastri* by— *Gopikamohan Bhattacharyya*, M.A. ... ... ... | 9.00 |
| 5 | **Muktivadavicara** of **Harirama Tarkalankara-Tarkavagisa**—edited with a Critical Commentary of MM. Kalipada Tarkacharya by— *Jagadish Chandra Tarkatīrtha*. ... ... ... ... | 10·00 |
| 6 | **Savasutakasaucaprakaranam** of **Bhavadevabhatta**—edited by— *Dr. R. C. Hazra*, M.A., Ph.D., D.Litt. ... ... ... | 5·00 |
| 7 | **Anumitermanasatvavicarah** of **Harirama Tarkalankara-Tarkavagisa** edited with a Critical Commentary of Pandit Taranath Nyāyatarkatīrtha by— *Dr. Gaurinath Sastri* M,A., D.Litt. ... ... ... ... | 8·00 |
| 8 | **Sangita-Damodara** of **Subhankara**—edited from newly discovered manuscripts by— *Dr. Gaurinath Sastri* and *Dr. Govindagopal Mukhopadhyaya*. ... | 15·00 |
| 9 | **Dhvamsa-Janyabhavayoh Karya-Karanabhavarahasyam** by **Harirama Tarkalankara-Tarkavagisa**—edited with a critical commentary of Pandit Jaminikanta Tarkatīrtha, by—*Sri Nani Gopal Tarkatirtha....* ... | 5·00 |
| 10 | **The Kavyaprakasa of Mammata, Part II, (VII.V—X) with a commentary by Sandhivigrahika Sridhara**—edited by—*Sivaprasad Bhattacharyya*. ... | 20·00 |

### Studies :

| | | |
|---|---|---|
| 11 | **Studies in the Upapuranas** (Saura and Vaiṣṇava) Vol. I. by— *Dr. R, C. Hazra*, M.A., Ph.D. D.Litt. ... ... ... | 25·00 |
| 12 | **The Philosophy of Word and Meaning**: An Indian Approach by— *Dr. Gaurinath Sastri*, M.A., D.Litt. ... ... ... | 20·00 |
| 13 | **Studies in the Upanisads** (A critical study of the Upaniṣadic Brahmavidyā on the basis of the twelve principal Upaniṣads) by— *Dr. Govindagopal Mukhopadhyaya*, M.A., D.Phil., Sānkhyatīrtha. | 15·00 |
| 14 | **Veda-Mimamsa, Vol, I (in Bengali)** (A masterly survey of the entire Vedic literature and a critical commentary on the *mantras*) by—*Anirvan*. ... | 10·00 |
| 15 | **Studies in Nyaya-Vaisesika Theism**, by *Dr. Gopikamohan Bhattacharyya* M.A., D.Phil ... ... | 15·00 |

## SHORTLY TO BE PUBLISHED :

16 **Vedartha-vicarah**, (A new interpretation and assessment of the Vedic *mantras*) by—*MM. Sitaram Sastri*. ... ... ... ...

17 **Mahavastu-Avadana**, the well-known Buddhist text with Bengali translation by—*Dr. Radhagovinda Basak*, M.A., Ph.D. ... ...

18 **Studies in the Upapuranas** (Śākta and Śaiva) Vol. II, by— *Dr. R. C. Hazra*, M.A., Ph. D. ; D. Litt. ... ... ...

Copies and informations may be had of : Firma K. L. Mukhopadhyaya, 6/1A, Bancharam Akrur Lane, Calcutta-12.